भविष्यत्यम्ब राजा हि तीव्रमारप्स्यते तपः ॥ ३५
एतच्छ्रुत्वा महाबाहुः सहदेवो युधां पतिः ।
युधिष्ठिरमुवाचेदं बाष्पव्याकुललोचनः ॥ ३६
नोत्सहेऽहं परित्यक्तुं मातरं पार्थिवर्षभ ।
प्रतियातु भवान्क्षिप्रं तपस्तप्स्याम्यहं वने ॥ ३७
इहैव शोषयिष्यामि तपसाहं कलेवरम् ।
पादशुश्रूषणे युक्तो राज्ञो मात्रोस्तथानयोः ॥ ३८
तमुवाच ततः कुन्ती परिष्वज्य महाभुजम् ।
गम्यतां पुत्र मैव त्वं वोचः कुरु वचो मम ॥ ३९
आगमा वः शिवाः सन्तु स्वस्था भवत पुत्रकाः ।
उपरोधो भवेदेवमस्माकं तपसः कृते ॥ ४०
त्वत्स्नेहपाशबद्धा च हीयेयं तपसः परात् ।
तस्मात्पुत्रक गच्छ त्वं शिष्टमल्पं हि नः प्रभो ॥ ४१
एवं संस्तम्भितं वाक्यैः कुन्त्या बहुविधैर्मनः ।
सहदेवस्य राजेन्द्र राज्ञश्चैव विशेषतः ॥ ४२
ते मात्रा समनुज्ञाता राज्ञा च कुरुपुंगवाः । C. 15. 999 B. 15. 36. 43 K. 15. 38. 43

(*sup. lin.* as in text) पश्यता (for पश्य नः). —b) D4. 6. 8 ततः (for तव). K1 B4. 5 Dn D2. 5. 7 दुर्लभं तव दर्शनं; T2 दर्शनं दुर्लभं तव. —c) B1 D3 अथ (for अम्ब). T3 राज्ञापि. K1 भविष्यं कुरुराजा हि; K2 भवतीयं च रा°; K4 भविष्यत्यथ रा°; B6 °ष्यश्चाथ रा°; Dn D2. 7 अविषह्यं च राजा हि. —d) K2 B1. 2. 4. 5 Dn D2. 7 चा(B1 त्वा)रप्स्यते; D5 T1. 3 G3. 4 आत° (for आर°).

36 T4 om. 36 (cf. v. l. 17). Before 36, D5 G3. 4 ins. वैशंपायनः. —a) K2 महाबाहो (for °बाहुः). —b) D4. 6 सहदेवं (for °देवो). D1 युधां पतिं; G3. 4 प्रतापवान्. —d) B2 बास्प-. D4. 6. 8 T3 -लोचनं.

37 T4 om. 37 (cf. v. l. 17). —a) K2–5 D4–6. 8 T1 G1. 3. 4 M5 नोत्सहामि; T2. 3 G2 न सहामि; M1 नोत्सहेत (for °हेऽहं). K1 त्वां (for ऽहं). —b) K1 B1. 2. 4–6 Dn D1–3. 7. 9 मातरं भरतर्षभ. —d) K1 B1. 4 Dn D2. 7. 9 विभो; K5 T1 वनं; B5 पुनः; D6 मुने (for वने). M3 प्रजानां पालनाय वै.

38 T4 om. 38 (cf. v. l. 17). —a) D8 T2. 3 G2–4 M5 वै (for [ए]व). —b) K1 B1. 2. 4–6 Dn D2. 3. 7. 9 [इ]दं; D1 [ए]व (for [अ]हं). D3–5 T1–3 G1–4 M1. 2 कलेयरं; D7 कळेबरं; D8 कळेवरं. —c) D1 सदा; D4 पांडु- (for पाद-). K1 मात्रो; K4. 5 यत्तो; B1. 2. 4. 5 Dn D2. 4. 7 रक्तो; D5 युक्ते; D6 क्तोसौ (sic); D8 om. (for युक्तो). —d) K1 रक्तस्; K5 भ्रात्रोस्; M1 मातुस् (for मात्रोस्). K3 [ए]तयोः (for [अ]नयोः). K4 T1 राज्ञो मातुस्तथैव च; D4–6. 8 T2. 3 G1–4 M5 राज्ञो (M5 °ज्ञा) मातुस्तथा(D5 °दा)नघ; D9 राज्ञा मात्रा तथानयोः.

39 T4 om. 39 (cf. v. l. 17). —a) D7 reads from कुन्ती up to पुत्र (in 39c) twice. —c) D2 तु (for त्वं). D4 गम्यतां मे पुत्र मैवं. —d) K3. 5 वाचः; D2 [अ]वोचः (for वोचः). B2 -कुलो (for वचो).

40 T4 om. 40 (cf. v. l. 17). —a) K2–5 च (for वः). —b) B6 सुस्था; G2 संतो; M2. 4. 5 स्वंता (for स्वस्था). K5 B4 भवतु; G3 भवथ. K1 सुस्था भवतु पुत्रकः (sic); K2 स्वस्वभावं तु पुत्रकाः; D4. 6. 8 G1 संतो भवतु (G1 °थ) पु°. —c) D4. 6. 8 T3 G1. 2 नैवम्; T2 मैवम्; M1 एतद् (for एवम्). —d) K2. 3 क्षितिः; K4 कृतं; K5 स्थितिः; B4 परात्; D1. 4–6. 8 T2. 3 G1. 3. 4 M5 कृतः (for कृते).

41 T4 om. 41 (cf. v. l. 17). B4 T1 om. 41ab. —a) K3 D7 तत् (for त्वत्). K2–5 D4–6. 8 T2. 3 G M हि (for च). —b) K4 हीयंते; M1 क्षीयेयं (for हीयेयं). G3. 4 M5 श्रेयसः (for तपसः). D5 ये ह्यं श्रेयतः परात् (sic); T2 दूयेहं श्रेयसः प°; T3 G2 हीयेहं (G2 भवेयं) श्रेयसः प°. —c) K2 G5 M1–3 तु (K2 च) पुत्र; K3 तत्पुत्र; D1 सुपुत्र (for पुत्रक). G1 गच्छध्वं (for गच्छ त्वं). M4 तस्मातु गच्छ पुत्र त्वं. —d) K1 B1. 4. 5 Dn D2. 7 च (for हि). M1. 3 श्लि- (M3 शि)ष्टमल्पं हि जीवितं.

42 T4 om. 42 (cf. v. l. 17): —a) K2 संश्रूषितैर्; K4 D1. 9 T2. 3 G3. 4 M5 संस्तंभितैर् (for °भितं). Dn1 वाक्यं (for वाक्यैः). K3 एवं संसूचितं वाक्यं. —b) K2 G5 M1–3 बहुविधं (for °विधैर्). —d) M5 विशेषितः (for °षतः).

43 T4 om. 43 (cf. v. l. 17). —a) K1 तैर्मात्रा; M1–3 मात्रा ते (by transp.). —b) G5 M2 ते (for च). D8 -पुंगव. —d) K1. 2 आमंत्रयतु. B6 आनतः (for आरभन्). K4 आमंत्रयत मातरं.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

C. 15. 1000 B. 15. 36. 44 K. 15. 35. 43 अभिवाद्य कुरुश्रेष्ठमामन्त्रयितुमारभन् ॥ ४३
राजन्प्रतिगमिष्यामः शिवेन प्रतिनन्दिताः ।
अनुज्ञातास्त्वया राजन्गमिष्यामो विकल्मषाः ॥ ४४
एवमुक्तः स राजर्षिर्धर्मराज्ञा महात्मना ।
अनुजज्ञे जयाशीर्भिरभिनन्द्य युधिष्ठिरम् ॥ ४५
भीमं च बलिनां श्रेष्ठं सान्त्वयामास पार्थिवः ।
स चास्य सम्यङ्मेधावी प्रत्यपद्यत वीर्यवान् ॥ ४६
अर्जुनं च समाश्लिष्य यमौ च पुरुषर्षभौ ।
अनुजज्ञे स कौरव्यः परिष्वज्याभिनन्द्य च ॥ ४७
गान्धार्या चाभ्यनुज्ञाताः कृतपादाभिवन्दनाः ।
जनन्या समुपाघ्राताः परिष्वक्ताश्च ते नृपम् ।
चक्रुः प्रदक्षिणं सर्वे वत्सा इव निवारणे ॥ ४८
पुनः पुनर्निरीक्षन्तः प्रजग्मुस्ते प्रदक्षिणम् ।
तथैव द्रौपदी साध्वी सर्वाः कौरवयोषितः ॥ ४९
न्यायतः श्वशुरे वृत्तिं प्रयुज्य प्रययुस्ततः ।
श्वश्रूभ्यां समनुज्ञाताः परिष्वज्याभिनन्दिताः ।
संदिष्टाश्चेतिकर्तव्यं प्रययुर्भर्तृभिः सह ॥ ५०
ततः प्रजज्ञे निनदः सूतानां युज्यतामिति ।
उष्ट्राणां क्रोशतां चैव हयानां हेषतामपि ॥ ५१
ततो युधिष्ठिरो राजा सदारः सहसैनिकः ।
नगरं हास्तिनपुरं पुनरायात्सबान्धवः ॥ ५२

इति श्रीमहाभारते आश्रमवासिकपर्वणि चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ समाप्तं पुत्रदर्शनपर्व ॥

---

44 T4 om. 44 (cf. v. l. 17). Before 44, MSS. ins. युधिष्ठिर उवाच. — ^{a}) Dn2 M4.5 राज्यं (for राजन्). K1 B6 D1.3–6.8.9 T1.2 G M1–4 -गमिष्यामि (for °ष्यामः). — ^{b}) B6 D1.3–6.8 T1.2 G M1 -नंदितः ; D7 -नंदिते ; T3 -नंदिनः ; M2–4 नंदन (sic) (for -नन्दिताः). — For 44^{ab}, K2–5 subst. :

91* आज्ञापय महाबाहो सर्वे त्वच्छासनानुगाः ।

— ^{d}) K3–5 M5 भविष्यामो (for गमि°). D4.6.8 T1–3 G1–4 भविष्यामो ह्यकल्मषाः ; D5 विचरिष्याम्यकल्मषः.

45 Before 45, K5 G6 ins. वैशंपायन उवाच. — ^{b}) T1 महामनाः (for °त्मना). — ^{c}) K1 B1.2.4–6 Dn D1–3.7.9 स कौरव्यम् ; G5 तदाशीर्भिर् (for जया°). — ^{d}) K2–5 B1.5 D4–6.8 S पूजयित्वा ; B4 अभिमंत्र्य (for °नन्द्य). B6 अभिनंदाग्रधिष्ठितं.

46 Dn2 om. 46–47. — ^{b}) K5 पार्थिव. — T1 om. 46^{cd}. — ^{c}) K1 वा (for च). — ^{d}) G5 M1–4 प्रत्यपद्यदनंतरं.

47 Dn2 om. 47 (cf. v. l. 46). — ^{b}) B1 D9 ययौ (for यमौ). D4–6.8 T G1–4 यमौ च भरतर्षभौ (D5 T3 °भ). — ^{c}) K2 अनुयज्ञे (for °जज्ञे). G1 कौरव्यं. B4 सांत्वयामास कौरव्यः. — ^{d}) K5 अभिवंद्य (for °नन्द्य).

48 ^{b}) K3.4 B1.2.4–6 Dn D1.2.7.9 G5 M1.2 वादनाः ; D5 -नंदनाः (for -वन्दनाः). — T1 om. 48^{c}–51^{d}. — ^{c}) K1 जनन्या समनुघ्राताः ; K2–5 B5 °न्या समनुज्ञाताः. — ^{d}) Dn1 D2.7 परिमुक्ताश्च ; B5 °युक्ताश्च (for °ष्वक्ताश्च). K2 [अ]थ वै (for च ते). K3.5 वै नृप ; B5 D1.3 ते भृशं ; D4.6.8 G2 M4 ते नृपाः ; D5 T2–4 G1.3–5 M1–3.5 ते नृप (for ते नृपम्). K4 परिमुक्ताश्च वै नृप.

49 T1 om. 49 (cf. v. l. 48). — ^{a}) D1 निरीक्ष्यंतः. — ^{b}) K1 B1.2.4–6 Dn D1–3.7.9 M3 प्रचक्रुस्त (for प्रजग्मुस्त). — ^{c}) K2.5 मुख्याः ; K3.4 ताश्च ; D4–6.8 T2–4 G1–4 M5 भद्रा (for साध्वी). K1 B1.2.4–6 Dn D1–3.7.9 द्रौपदीप्रमुखाश्चैव. — ^{d}) D8 damaged. G5 M1–4 च कुरु- (for कौरव-). D4–6 T2–4 G1–4 M5 पांड्यजा भुजगेंद्रजा.

50 T1 om. 50 (cf. v. l. 48). — ^{a}) K2.5 श्वसुरे ; K3 स्वसुरे (for श्वशुरे). D4.6.8 G2 भद्रं (for वृत्तिं). K1 मायुतः शिशुरे वृत्तिं (sic). K4 आयातः श्वसुरे वृत्तिं. — ^{b}) K4 प्रययुः ; B6 प्रगृह्य (for प्रयुज्य). K3–5 D5 T2 तदा ; D4 तथा (for ततः). — D5 reads 50^{cd} twice. — ^{c}) K3.5 स्वश्रूभ्यां (sic). D5 (second time) गांधार्या चाभ्यनुज्ञाताः = (48^{a}). — ^{d}) D5 (second time) -नंद्य च (for -नन्दिताः). K1 परिष्वक्ताभिनंदिताः. — ^{e}) B6 संदेशश्च (for संदिष्टाश्च). K4 ते प्र- (for चेति-). D4.6.8 वक्तव्यं (for -कर्तव्यं). — ^{f}) D5 तैर्ययुर् ; G3.4 स्वैर्ययुर् (for प्रययुर्). K3 D9 भ्रातृभिः ; G5 M1–4 पांडवैः (for भर्तृभिः). K1 प्रययुर्भरतर्षभ ;

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

४५

वैशंपायन उवाच ।
द्विवर्षोपनिवृत्तेषु पाण्डवेषु यदृच्छया ।
देवर्षिर्नारदो राजन्नाजगाम युधिष्ठिरम् ॥ १
तमभ्यर्च्य महाबाहुः कुरुराजो युधिष्ठिरः ।
आसीनं परिविश्वस्तं प्रोवाच वदतां वरः ॥ २
चिरस्य खलु पश्यामि भगवन्तमुपस्थितम् ।
कच्चित्ते कुशलं विप्र शुभं वा प्रत्युपस्थितम् ॥ ३
के देशाः परिदृष्टास्ते किं च कार्यं करोमि ते ।
तद्ब्रूहि द्विजमुख्य त्वमस्माकं च प्रियोऽतिथिः ॥ ४
नारद उवाच ।
चिरदृष्टोऽसि मे राजन्नागतोऽस्मि तपोवनात् ।
परिदृष्टानि तीर्थानि गङ्गा चैव मया नृप ॥ ५ C. 15. 1015 B. 15. 37. 5 K. 15. 39. 5

T1 निर्ययुर्भ्रातृभिः सह.

51 ^{b}) K2.5 रथानां; K4 भूतानां; G1 सुतरां (for सूतानां). — ^{c}) D1 वीराणां (for उद्भ्राणां). K1 B1. 4–6 Dn D1–3. 7. 9 M4. 5 चापि (for चैव). — ^{d}) D1. 7. 8 इति (for अपि). K2–5 हयानां चैव हेषतां.

52 ^{b}) T3 सपौरः (for सदारः). K1. 5 D4. 5 T4 -सैनिकाः (for °कः). — ^{c}) K1 नागरं (sic). D8 T2. 4 G1–4 M1. 3. 5 हस्तिनपुरं. — ^{d}) D8 damaged.

Colophon. — *Adhy. name:* D4. 6. 8 G1 प्रतियानं; T3 प्रतिप्रयाणं. — *Adhy. no.* (figures, words or both): K2 39; K4 42; K5 D4. 6. 8 T2 G1. 2. 5 M1–4 43; D1 38; D5 T3. 4 G3. 4 44 (as in text); D7 37; T1 40; M5 45. — *Śloka no.:* K4 81; D9 54.

45

☞ This adhy. is missing in Ś1 B3 (cf. v. l. 15. 3. 3; 22. 1).

1 ^{a}) K1 द्विवर्षेप-; K2 °र्षेपि; D4. 8 T2. 4 G1–4 तेषु चोप-; D5 तेषु चापि; T1 तेषु चाथ; G5 M1–4 नृपेषु च; M5 तेषु चाप- (for द्विवर्षोप-). D3 -निवृत्ते तु (for °त्तेषु). D1 द्विवर्षे चापि नीतेषु; D6 तेषु चोपरिवृत्तेषु; T3 तेषु चोपनिविष्टेषु. — ^{b}) K2–5 T3 महात्मसु (for यदृच्छया). — After 1^{ab}, T3 ins.:

92* कदाचिन्नगरे नागसाह्वये च यदृच्छया ।

— ^{c}) D8 damaged. K4 प्राज्ञ (for राजन्).

2 ^{a}) K5 महाबाहो; M4 °राजः (for °बाहुः). — ^{b}) K5 महाबल (for युधिष्ठिरः). — ^{c}) D5 -पार्श्वस्थं (for -विश्वस्तं). — ^{d}) K1. 5 वर; D7 T2. 8 वरं (for वरः). — For 2^{cd}, D1 subst.:

93* उवाच वचनं वाग्मी प्रश्रयावनतः सुधीः ।

3 Before 3, D4. 6. 8 G2 M1 ins. युधिष्ठिरः. — ^{a}) T1 बत (for खलु). K2. 4. 5 पश्यामो (for °मि). K1 B1 चिरं त्वां नानुपश्यामि; B1. 5 Dn D2. 7 चिरात्तु (B1. 5 °त्वां) नानुप°; B2. 6 D3. 9 चिरात्तु त्वां न प° (D3 त्वानुप°); D1 चित्रं तु त्वां नु प°. — ^{b}) D1 T4 उपास्थितं. — B4 D6. 8 T1 om. (hapl.) 3^{cd}. — ^{c}) K2–5 नः; D4. 5 T2–4 G3–5 M सु- (for ते). — ^{d}) K4 D4. 5 T2–4 G1–4 शुभं वा (D4 सुखानां; G1 सुखं वा) पर्युपस्थितं. — After 3, T2 ins.:

94* अभिवाद्याब्रवीद्राजन्भ्रातृभिः सह पाण्डवः ।

4 K5 om. 4. B6 om. 4^{a}–5^{b}. — ^{a}) D4–6. 8 S के देशा भवता दृष्टाः. — ^{b}) D4–6 T2. 4 कार्यं (T2 °र्लं) किंचित्; D8 T1. 3 G1. 2. 5 M कार्यं किं च (by transp.). G5 M2 करोषि वै (for °मि ते). G3. 4 कानि तीर्थानि वै मुने. — ^{c}) K3. 4 ब्रूहि मे (for तद्ब्रूहि). K2 Dn D2. 3. 7 -मुख्यस् (for -मुख्य). G3. 4 कस्माच्चागमनं ब्रह्मंस्. — ^{d}) D6 damaged. K1–4 B2 त्वमस्माकं; B1. 4. 5 D3. 9 T1 G3. 4 त्वं ह्यस्माकं; D4 सदास्माकं; D5. 6 T2–4 M1. 3. 5 ह्यस्माकं च (for अ°). B2 T1. 3 G1. 4. 5 M2–4 प्रियातिथिः (for प्रियोऽतिथिः). Dn D2. 7 त्वं ह्यस्माकं परा गतिः.

5 B6 om. 5^{ab} (cf. v. l. 4). K1 om. 5 (without the ref.). — ^{a}) B1. 4. 5 G1 चिरं (for चिर-). K2 G5 -दृष्टोसि; T3 -दृष्टानि (for -दृष्टोऽसि). K2 ते (for मे). K2–5 त(K4 य)स्माद्; B1. 5 Dn D1–3. 7 [इ]त्येवम्; B2. 4 D9 [ऽ]चैवम् (for राजन्). — ^{b}) K4 D6. 8 [ऽ]सि; B1. 4. 5 Dn D2. 7 [ऽ]हं (for ऽस्मि). T4 तपोधनात् (for °वनात्). G6 M1–4 आगच्छामि तपोवनात्. — ^{c}) B6 चिर- (for परि-). — ^{d}) D1. 3 तथा (for मया). T1 [अ]नघ (for नृप).

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

C. 15. 1016
B. 15. 37. 6
K. 15. 39. 6

युधिष्ठिर उवाच ।
वदन्ति पुरुषा मेऽद्य गङ्गातीरनिवासिनः ।
धृतराष्ट्रं महात्मानमास्थितं परमं तपः ॥ ६
अपि दृष्टस्त्वया तत्र कुशली स कुरूद्वहः ।
गान्धारी च पृथा चैव सूतपुत्रश्च संजयः ॥ ७
कथं च वर्तते चाद्य पिता मम स पार्थिवः ।
श्रोतुमिच्छामि भगवन्यदि दृष्टस्त्वया नृपः ॥ ८
नारद उवाच ।
स्थिरीभूय महाराज शृणु सर्वं यथातथम् ।
यथा श्रुतं च दृष्टं च मया तस्मिंस्तपोवने ॥ ९
वनवासनिवृत्तेषु भवत्सु कुरुनन्दन ।
कुरुक्षेत्रात्पिता तुभ्यं गङ्गाद्वारं ययौ नृप ॥ १०
गान्धार्या सहितो धीमान्वध्वा कुन्त्या समन्वितः ।
संजयेन च सूतेन साग्निहोत्रः सयाजकः ॥ ११
आतस्थे स तपस्तीव्रं पिता तव तपोधनः ।
वीटां मुखे समाधाय वायुभक्षोऽभवन्मुनिः ॥ १२
वने स मुनिभिः सर्वैः पूज्यमानो महातपाः ।
त्वगस्थिमात्रशेषः स षण्मासानभवन्नृपः ॥ १३

---

6 K1.3 D4–6.8 T G1.2 M5 om. the ref. G3 om. 6. — a) K5 मेद्य स्वं (sic); B2 एद्य; T1 तत्र (for मेऽद्य). — b) B2 D3.9 -निवासिनं (for °नः). — 6cd is partly damaged in D8. — For 6, G4 subst.:

95* वदन्ति पितरं ज्येष्ठमास्थितं परमं तपः ।
तं द्रष्टुं तत्र गत्वाहमागतो नृपसत्तमम् ।

7 K1 om. 7–8. Before 7, D4–6.8 T G1.2.4 M5 ins. युधिष्ठिरः. — a) B1.2.4.5 Dn D2.3.7 परि- (for अपि). K4 यत्र (for तत्र). — G4 om. 7c–8b. — d) D1 तु (for च).

8 K1 om. 8; G4 om. 8ab (for both, cf. v. l. 7). — a) B4 कथंचिद् (for कथं च). G5 M1–4 नु (for च). K2–5 D4–6.8 T2–4 M5 वर्तयते (for च वर्तते). T1 कथं वर्तयते चापि. — D8 damaged for 8bcd. — b) K2–5 B6 D4–6.9 T2–4 G1–3.5 M स पिता मम पार्थिवः; T1 मम माता यशस्विनी. — d) K4 T2 [अ]नघ; K5 D1.6 नृप; D9 पुनः; G5 M1.2 प्रभो; M3.4 विभो (for नृपः).

9 K1 om. the ref. — a) K2–5 B6 D3 स्थिरीभूत्वा; D1 °भूतो; D4–6.8.9 S स्थिरो भूत्वा (for स्थिरीभूय). K4 महाबाहो; D8 om. (for °राज). — b) K1 B1.2.4–6 Dn D1–3.7.9 वृत्तं (for सर्वं). K1 D4.6.8 यथा तथा; T4 om. (hapl.) यथातथम्. — c) K3 D4–6.8 S (except T4) यथा दृष्टं (M2 दृढं) (for च दृष्टं च).

10 K5 transp. 10 and 11. 10ab is partly damaged in D8. — a) D4–6 T2–4 G M2–5 वनवासान् (for °वास-). — c) D4.6.8 G1 तथा तुभ्यं; G5 M1–4 कुरुश्रेष्ठो (for पिता तुभ्यं). — d) K4 गंगातीरं (for °द्वारं). K4 पुनः; D4–6.8.9 T1.3 G1–4 नृपः; G5 M1–4 वशी (for नृप).

11 K5 transp. 10 and 11. — a) D1 गांधारी (for °र्या). G5 M1–4 राजा (for धीमान्). — b) D1.9 तथा (for वध्वा). K2–5 [अ]पि चान्वितः; T2 समाहितः (for समन्वितः). G5 M2 वध्वा कुक्षौ भवन्मुनिः (sic). — d) B4 अग्नि- (for साग्नि-). K1 साग्निहोत्रस्य याजकः.

12 a) D1 हि (for स). K2–5 B6 आतस्थे तत्र तीव्रं स. — b) K2.3.5 त(K2 नृ)पो नृप (for तपोधनः). K4 पिता ते च तपो नृप. — For 12ab, D4–6.8 S subst.:

96* तत्रोग्रं तप आस्थाय धृतराष्ट्रो महामनाः ।

[T4 om. the prior half; D8 partly damaged for the same. G1.3.4 M4.5 ततोग्रं (for तत्रोग्रं). T1 तप उग्रं समास्थाय (for the prior half).]

— c) K1.4 वीर्यां (K4 वायुं) मुखे; G1 अग्निं मुखे; G3.4 दृढं मनः; M1.3.4 मुखे वीटां (by transp.); M5 मुखे पीडां. B1.4.6 Dn D2.3.7 समादाय (for °धाय). D4–6.8 T3.4 G2.5 M2 मुखे पीडं (D4 पिंडं; D5 सिद्धिं; T3 विद्धं; T4 विष्टं; G5 M2 पीडां) समादाय; T1 ततो विधिं समास्थाय; T2 मुखे पीटं समास्थाय. — d) K5 B2 वायुभक्ष्यो.

13 b) T1 पूज्यमाने (for °मानो). — c) K2.3.5 वै; K4 वा; D1.3 तु; G5 M1–4 हि (for स). D4–6 T G2–4 M5 त्वगस्थिमात्राव(M5 °वि)शेषः; D8 damaged; G1 त्वगस्थिमात्रावशेषेण (hypermetric). — d) D3–6.8 T4 G2 M3 षण्मासाद् (for °सान्). T3 अगमन् (for अभवन्). K5 D1.5 T2 G3.4 M4 नृप. G1 माससाद भवन्नृपः (sic).

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गान्धारी तु जलाहारा कुन्ती मासोपवासिनी ।
संजयः षष्ठभक्तेन वर्तयामास भारत ॥ १४
अग्नींस्तु याजकास्तत्र जुहुवुर्विधिवत्प्रभो ।
दृश्यतोऽदृश्यतश्चैव वने तस्मिन्नृपस्य ह ॥ १५
अनिकेतोऽथ राजा स बभूव वनगोचरः ।
ते चापि सहिते देव्यौ संजयश्च तमन्वयुः ॥ १६
संजयो नृपतेर्नेता समेषु विषमेषु च ।
गान्धार्यास्तु पृथा राजंश्चक्षुरासीदनिन्दिता ॥ १७
ततः कदाचिद्गङ्गायाः कच्छे स नृपसत्तमः ।
गङ्गायामाप्लुतो धीमानाश्रमाभिमुखोऽभवत् ॥ १८

अथ वायुः समुद्भूतो दावाग्निरभवन्महान् ।
ददाह तद्वनं सर्वं परिगृह्य समन्ततः ॥ १९
दह्यत्सु मृगयूथेषु द्विजिह्वेषु समन्ततः ।
वराहाणां च यूथेषु संश्रयत्सु जलाशयान् ॥ २०
समाविद्धे वने तस्मिन्प्राप्ते व्यसन उत्तमे ।
निराहारतया राजा मन्दप्राणविचेष्टितः ।
असमर्थोऽपसरणे सुकृशौ मातरौ च ते ॥ २१
ततः स नृपतिर्दृष्ट्वा वह्निमायान्तमन्तिकात् ।
इदमाह ततः सूतं संजयं पृथिवीपते ॥ २२
गच्छ संजय यत्राग्निर्न त्वां दहति कर्हिंचित् । C. 15. 1033 B. 15. 37. 23 K. 15. 39. 23

---

14 ^{a}) K2.4.5 B4 M1 च (for तु). K1 तुलाहारा; K4 जलाहारं; B6 Dn D2.7.9 G1 M1 °हारी (for °हारा). —^{b}) B6 कुंत्या माष्टोपधारिणी (sic). —^{c}) B6 partly damaged. K1.2.5 D5 T1.3.4 G1 -भुक्तेन; B2 -भक्षेन (for -भक्तेन). G5 M1–4 संजयस्त्वष्टमे भक्ते (M4 भुक्ते).

15 ^{a}) K1 अग्नेस्; D1 अग्निं. D9 यावकास् (for याज°). T4 om. तत्र. —^{d}) K1 B1.2.4–6 Dn D1–3 वै; K2.5 G4 च; K3 D8 हि (for ह).

16 K1 om. 16^{abc}. —^{a}) B6 damaged; G2.4.5 आग्निकेतो (for अनि°). K2.5 D4–6.8 S हि; K3 च (for ऽथ). B6 यो; D4–6.8 T G1–4 M5 [अ]सौ (for स). K4 अनिकेतस्य राजा स. —^{c}) D1 (marg.) दिव्यौ (for देव्यौ). K3 तं चापि सहितौ देव्यौ; B1 ते चापि सहितैर्दिव्यौ. —^{d}) M1 तु (for च). K5 तमन्वगुः; D4.6.8 G1.2 M5 समन्वयुः (for तम°).

17 ^{a}) K3.4 सार्धं (for नेता). — T1 om. 17^{cd}. —^{c}) K4 चैव (for राजंश्). —^{d}) G1 चक्षुषासीदनिंदिता.

18 ^{a}) K2–5 T2.3 गंगायाम्. —^{b}) K1 कक्षे च; K2.5 आप्लुत्य; Dn1 कच्छे सन् (for कच्छे स). D5 T1.2.4 G1.3–5 M कुरु- (for नृप-). K2 T4 M5 -सत्तम. K3 अ[आ]प्लुत्य कुरुनंदनः; K4 आप्लुत्य च निवृत्य च; D4.6.8 G2 कच्छे स कुरुपुंगवः; T3 कस्मिंश्च कुरुसत्तमः. — T4 om. (hapl.) 18^{c}–21^{b}. —^{c}) T3 प्रदेशाद् (for गङ्गायाम्). K3.5 निवृत्य च ततो धीमान्. —^{d}) K3 D4.6.8 T1.3 G1–4 M5 ययौ; D5 ययुः; T2 यथा (for ऽभवत्).

19 T4 om. 19 (cf. v. l. 18). B2 om. 19^{ab}. —^{a}) K1–4 B1.5 वायु- (for वायुः). G1 समुद्धतो. B4 T2.3 G2–5 M1.2.5 अथ वायुसमुद्भूतो. —^{b}) K2.5 D5.6 S (T4 om.) दवाग्निर्. — Dn2 om. 19^{c}–20^{d}. —^{c}) K2.5 G5 M1–3 स; K3.4 D4–6.8 T1–3 G1–4 च (for तद्).

20 Dn2 T4 om. 20 (cf. v. l. 19, 18). —^{a}) K1 दह्यन्; D5 T1–3 M3 दहत्सु; G3 बहुषु; G4 बहुत्सु (sic) (for दह्यत्सु). K2 गज- (for मृग-). — K om. (hapl.) 20^{bc}. —^{b}) D4–6.8 S (T4 om.) विह्वले(D6 M5 °रे)षु (for द्विजिह्वेषु). —^{d}) K2 जलान्प्रियं (sic); K3–5 जलाश्रयं; D1 °श्रयान् (for °शयान्). K1 स श्रयत्सजलाश्रयात्; B5.6 संश्रयास्स्वजलाशयात्.

21 T4 om. 21^{ab} (cf. v. l. 18). —^{a}) K2.5 G5 M1–4 सुसमिद्धे; D1 ससंविद्धे; D4–6.8 T1–3 G1–4 M5 संप्रदीप्ते (for समाविद्धे). —^{b}) K1 D2 व्याप्ते (for प्राप्ते). K2.3 D1.7 व्यसनम्. D4–6.8 उत्तमं (for °मे). K4.5 S (T4 om.) प्राप्तो व्य(K4 °प्तव्य)सनमुत्तमं. —^{c}) G4 राजन् (for राजा). K3 निराहारस्ततो राजा. —^{d}) M5 -विचेष्टितं. —^{e}) K1 असय[म]र्थोपमरणं. —^{f}) K1 T4 सुकृते; K3 सुकृत्वो; K5 सकृषे; D4.6.8 G1 सुकृतौ; D5 चुकृषे; M1.2.4 कृशे ते (for सुकृशौ). K2 सुतप्तौ मातरौ वने.

22 ^{a}) K2 बुद्ध्वा (for दृष्ट्वा). —^{b}) K1–3.5 अंतिकं; K4 T1 °के; Dn2 अंतकात्. —^{c}) K2.3.5 D4–6.8 S वचः (for ततः). K3.4 तत्र (for सूतं). —^{d}) K2–5 पृथिवीपतिः. K1 B1.2.4–6 Dn D1–3.7.9 संजयं जय(K1 वद)तां वरः (B2 D3 °रं).

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

C. 15. 1034
B. 15. 37. 24
K. 15. 39. 23

वयमत्राग्निना युक्ता गमिष्यामः परां गतिम् ॥ २३
तमुवाच किलोद्विग्नः संजयो वदतां वरः ।
राजन्मृत्युरनिष्टोऽयं भविता ते वृथाग्निना ॥ २४
न चोपायं प्रपश्यामि मोक्षणे जातवेदसः ।
यदत्रानन्तरं कार्यं तद्भवान्वक्तुमर्हति ॥ २५
इत्युक्तः संजयेनेदं पुनराह स पार्थिवः ।
नैष मृत्युरनिष्टो नो निःसृतानां गृहात्स्वयम् ॥ २६
जलमग्निस्तथा वायुरथ वापि विकर्शनम् ।
तापसानां प्रशस्यन्ते गच्छ संजय माचिरम् ॥ २७
इत्युक्त्वा संजयं राजा समाधाय मनस्तदा ।
प्राङ्मुखः सह गान्धार्या कुन्त्या चोपाविशत्तदा ॥ २८
संजयस्तं तथा दृष्ट्वा प्रदक्षिणमथाकरोत् ।
उवाच चैनं मेधावी युङ्क्ष्वात्मानमिति प्रभो ॥ २९
ऋषिपुत्रो मनीषी स राजा चक्रेऽस्य तद्वचः ।
संनिरुध्येन्द्रियग्राममासीत्काष्ठोपमस्तदा ॥ ३०
गान्धारी च महाभागा जननी च पृथा तव ।
दावाग्निना समायुक्ते स च राजा पिता तव ॥ ३१
संजयस्तु महामात्रस्तस्माद्दावादमुच्यत ।
गङ्गाकूले मया दृष्टस्तापसैः परिवारितः ॥ ३२
स तानामन्त्र्य तेजस्वी निवेद्यैतच्च सर्वशः ।

---

23 ^{b}) $D_{1.6.8}$ S (except T_3) त्वा (for त्वां). — ^{c}) K_{2-5} त्विहाग्निना; $D_{4-6.8}$ $T_{1.3.4}$ G_{1-4} M_5 अप्यग्निसं- (for अत्राग्निना). M_4 दग्धा (for युक्ता). T_2 वयमग्निपु संयुक्ता; G_5 M_{1-3} °प्यग्निना दग्धा.

24 ^{a}) T_2 ततोद्विग्नः. — ^{b}) D_1 जयतां (for वदतां). $D_{6.8}$ वर (for वरः). — ^{c}) K_1 राजा (for राजन्). — ^{d}) K_1 ऽयथाग्निना; $D_{4-6.8}$ T $G_{1.2}$ M_5 यथाग्निना (for वृथा°).

25 ^{a}) K_2 तथा (for न च). — ^{c}) K_1 पदांतानंतरं कार्यं. — ^{d}) K_2 कर्तुम् (for वक्तुम्). K_4 B_4 $D_{1.9}$ G_3 M_3 अर्हसि (for °ति).

26 ^{a}) K_4 इह; M_3 एवं (for इदं). — ^{b}) K_5 पार्थिव. — ^{c}) $G_{1.2}$ M_5 नैव (for नैष). K_1 अनिष्यो (sic) (for अनिष्टो). K_1 वा; $K_{2.4.5}$ B_2 [ऽ]यं; B_6 D_9 मे (for नो). — ^{d}) K_1 Dn_1 निसृतानां. $K_{2.3.5}$ $D_{4-6.8}$ S निःसृता हि (D_5 °ता वा) गृहाद्वयं; K_4 निः[त्रिः]सस वै गृहाद्वयं (sic).

27 ^{a}) M_4 यथा (for तथा). — ^{b}) T_4 [अ]नाशीति; M_5 अथ वायुर् (for अथ वापि). MSS. विकर्षणं (for °र्शनम्). K_4 तापसानां प्रशस्यते. — ^{c}) K_1 D_5 प्रशंसंते; K_5 प्रपश्यंते; B_6 स पस्यंति (sic); $D_{4.6}$ प्रपत्स्येते; D_8 damaged; T_1 प्रशस्तं हि; G_1 प्रपत्स्ये तैः (sic); G_4 प्रशंसते (for प्रशस्यन्ते). K_4 एतत्कारणतो वीर.

28 ^{a}) $K_{1.4}$ D_9 इत्युक्तः (for °क्त्वा). B_2 संजयो (for °यं). — ^{b}) K_1 D_5 समादाय (for °धाय). Dn $D_{2.4.6.7}$ T_{1-3} G_3 तथा (for तदा). — T_4 om. (hapl.) 28^{c}–30^{d}. — ^{c}) $K_{1.4}$ प्राङ्मुखं (K_1 °खा). — ^{d}) K_5 कुंती (for कुन्त्या). K_1 T_2 G_1 चोपविशत् (for चोपा°). B_4 कुंत्या चोपविवेश ह; $D_{1.3}$ कुंत्याग्निं प्राविशत्तदा.

29 T_4 om. 29 (cf. v. l. 28). K_2 om. (hapl.) 29–31. — ^{a}) Dn_2 तत्; D_1 तु (for तं). K_3 G_4 तदा; B_4 यथा (for तथा). — ^{b}) D_8 damaged. — ^{c}) B_6 चैवं. K_4 मेधी च (for मेधावी). — ^{d}) K_1 युंज; B_6 त्यज (for युङ्क्ष्व). $K_{4.5}$ इहात्मना (for इति प्रभो). K_3 वियुंक्ष्वात्मानमात्मना; $D_{4-6.8}$ S (T_4 om.) युज्य(T_1 °क्ष)स्वेति नराधिपं.

30 K_2 T_4 om. 30 (cf. v. l. 29, 28). T_1 om. 30^{ab}. — ^{a}) K_4 हि; D_4 च; T_3 G_5 M_{1-4} सन् (for स). — ^{c}) =(var.) 6. 34. 4^{a}. $G_{3.4}$ संनियम्य (for °रुध्य). B_2 -ग्रामान् (for -ग्रामम्). K_1 corrupt; K_4 T_2 G_2 $M_{1.4.5}$ संनिरुद्धेंद्रियग्रामम्. — ^{d}) K_3 D_6 T_3 $M_{3.4}$ तथा (for तदा).

31 K_2 om. 31 (cf. v. l. 29). — ^{a}) D_8 damaged. K_{3-5} D_{4-6} S महाप्रा(K_3 °प्र)ज्ञा (for °भागा). — ^{b}) K_5 तथा (for पृथा). — B_2 om. (hapl.) 31^{cd}. — ^{c}) $T_{2.3}$ $G_{2.4.5}$ $M_{1-3.5}$ दवाग्निना. K_4 D_4 समायुक्ताः (for °युक्ते). $D_{6.8}$ T_1 G_1 दवाग्निना समायुक्तः.

32 ^{a}) $K_{2.4.5}$ स; B_2 D_6 T_1 च (for तु). K_{3-5} महामात्यस्; $D_{4-6.8}$ S (except G_5) महाप्राज्ञस् (M_2 °ज्ञ) (for °मात्रस्). — ^{b}) B_6 $D_{4.6}$ M_3 अ(M_3 वि)-मुच्यते; G_5 $M_{2.4}$ ऽय(M_4 प्र)मुच्यत (for अ°). — ^{c}) $M_{1.2.4}$ -तीरे (for -कूले). M_3 दृष्टास् (for दृष्टस्). — ^{d}) D_8 damaged.

33 ^{a}) K_4 तद्वृत्तं (for तेजस्वी). — ^{c}) K_1 $B_{1.2.4-6}$ Dn $D_{1-3.7.9}$ धीमान्; $K_{2.5}$ तात; K_4 ततो (for

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रययौ संजयः सूतो हिमवन्तं महीधरम् ॥ ३३
एवं स निधनं प्राप्तः कुरुराजो महामनाः ।
गान्धारी च पृथा चैव जनन्यौ ते नराधिप ॥ ३४
यदृच्छयानुव्रजता मया राज्ञः कलेवरम् ।
तयोश्च देव्योरुभयोर्दृष्टानि भरतर्षभ ॥ ३५
ततस्तपोवने तस्मिन्समाजग्मुस्तपोधनाः ।
श्रुत्वा राज्ञस्तथा निष्ठां न त्वशोचन्गतिं च ते ॥ ३६
तत्राश्रौषमहं सर्वमेतत्पुरुषसत्तम ।
यथा च नृपतिर्दग्धो देव्यौ ते चेति पाण्डव ॥ ३७
न शोचितव्यं राजेन्द्र स्वन्तः स पृथिवीपतिः ।
प्राप्तवानग्निसंयोगं गान्धारी जननी च ते ॥ ३८

वैशंपायन उवाच ।

एतच्छ्रुत्वा तु सर्वेषां पाण्डवानां महात्मनाम् ।
निर्याणं धृतराष्ट्रस्य शोकः समभवन्महान् ॥ ३९
अन्तःपुराणां च तदा महानार्तस्वरोऽभवत् ।
पौराणां च महाराज श्रुत्वा राज्ञस्तदा गतिम् ॥ ४०
अहो धिगिति राजा तु विक्रुश्य भृशदुःखितः ।
ऊर्ध्वबाहुः स्मरन्मातुः प्ररुरोद युधिष्ठिरः ।
भीमसेनपुरोगाश्च भ्रातरः सर्व एव ते ॥ ४१
अन्तःपुरेषु च तदा सुमहान्रुदितस्वनः ।

C. 15. 1053
B. 15. 37. 43
K. 15. 39. 43

सूतो). — ^{d}) K_{4} नगेश्वरं; $D_{4-6.8}$ $T_{1.2.4}$ G M महागिरिं; T_{3} गिरिं प्रति (for महीधरम्).

34 ^{a}) G_{1} सु- (for स). — ^{b}) B_{5} युधिष्ठिर; D_{1} महातपाः; G_{5} M_{1-4} महीपते (for महामनाः). — $G_{3.4}$ om. 34^{cd}. — ^{c}) D_{8} damaged. G_{5} M_{1-4} मातरौ ते गते स्वर्गं. — ^{d}) K_{2-4} D_{4} T_{1-3} G_{2} जननी (for जनन्यौ). D_{3} [इ]ति (for ते). K_{1} $B_{1.4-6}$ Dn $D_{1-3.7.9}$ M_{5} विशां पते; B_{2} G_{5} $M_{2.3}$ जनाधिप; M_{1} हि भारत (for नराधिप). $D_{5.6.8}$ T_{4} G_{1} जननी ते जनाधिप.

35 ^{a}) $K_{1.2.5}$ B_{2} T_{1-3} $G_{1.3-5}$ M_{1-3} तु (for [अ]नु-). — ^{b}) K_{1} राज्ञा; T_{4} दग्धः (for राज्ञः). $D_{3.5.6}$ T_{1} G_{1} कलेबरं; $D_{4.8}$ कलेवरः; D_{7} T_{2-4} G_{2-4} $M_{1.2}$ कळेबरं. — ^{c}) K_{1} देव्या (for देव्योर्). — ^{d}) Dn $D_{2.7}$ मया दृष्टानि भारत; G_{5} M_{1-4} दृष्टं भरतसत्तम.

36 ^{a}) T_{3} ततो वने (for तपोवने). — ^{c}) $K_{2.4}$ $B_{1.4-6}$ Dn $D_{2.7.9}$ $M_{3.5}$ तदा; T_{4} damaged; M_{4} ततो (for तथा). K_{1} श्रुत्वा राज्ञस्तता निष्ठा (sic). — ^{d}) $K_{2.3.5}$ $B_{2.6}$ $D_{1.3-6.8}$ T_{2-4} G_{2-4} M_{5} अन्वशो- (D_{5} °वो)चन्; D_{9} नानु°; G_{5} M_{1-3} अशोचंत (for न त्वशोचन्). $B_{1.4-6}$ Dn $D_{1-3.7}$ गतीश्च (for गतिं). K_{1} न त्वशोवनतेश्च ते (sic); M_{4} अग्नौ हंत गमिष्यते.

37 $D_{4.6.8}$ om. (hapl.) 37–38. — ^{a}) K_{2} तथा (for तत्र). — ^{c}) K_{1} corrupt. B_{6} $D_{1.7}$ तथा (for यथा). $K_{2.5}$ D_{5} S स (for च). — ^{d}) K_{1} corrupt. M_{1} [इ]ह (for [इ]ति). D_{5} $T_{1.3.4}$ G_{1-3} M_{5} ते देव्यौ चैव पांडव; T_{2} तथा देव्यौ च पां°; G_{4} ते देव्यौसि च पां° (sic).

38 $D_{4.6.8}$ om. 38 (cf. v. l. 37). — ^{a}) D_{5} S (except M_{5}) शोचितव्यो (M_{2} °व्या) (for °तव्यं). K_{2-5} कौरव्य; $G_{2.4}$ राजेंद्रः (for °द्र). — ^{b}) K_{1} त्वत्तः स; B_{1} Dn $M_{4.5}$ स्वतः स; B_{6} स्वस्थाने; D_{1} पितुः स; D_{3} मृतः स; D_{5} $T_{1.2.4}$ G_{1-3} स्व(G_{2} स)र्गस्थः; D_{7} om.; T_{3} स्वर्गतः; G_{5} सस्वर्गः (for स्वन्तः स). B_{6} D_{1} -पते (for -पतिः). K_{2-5} स्वर्गं स नृपतिर्गतः. — ^{c}) K_{4} असि (sic) (for अग्नि-). K_{1} -संभूतं; T_{2} G_{2-5} M_{6} -संयोगाद् (for -संयोगं).

39 ^{a}) $K_{1.3.4}$ $B_{1.5}$ Dn $D_{2.3.7}$ M_{5} च (for तु). — ^{b}) D_{3} om. (hapl.) महात्मनाम्. — ^{c}) $K_{4.5}$ निर्वाणं; G_{5} M_{1-4} निष्ठानं (for निर्याणं). — ^{d}) K_{4} ततः; T_{4} नृप (for महान्).

40 ^{a}) K_{1} आर्तः पुराणं (sic). $K_{2.5}$ रुदतां; T_{1} च तथा (for च तदा). — ^{b}) $T_{2.3}$ $G_{3.4}$ $M_{1.3.4}$ आर्तस्वनो (for °स्वरो). T_{2} महत् (for ऽभवत्). — ^{d}) $B_{2.6}$ $D_{3-6.8}$ S (except G_{1}) तथा (for तदा). B_{6} मतिः (for गतिम्). $K_{2.3.5}$ श्रुत्वा राज्ञस्तथा विधिं; K_{4} D_{1} राज्ञः श्रुत्वा तथा (K_{4} °दा) गतिं.

41 T_{4} om. 41–42. — ^{a}) $D_{4.6.8.9}$ $T_{2.3}$ G_{1-4} च; D_{5} T_{1} M_{5} स (for तु). — ^{b}) K_{1} विक्रम्य (sic); D_{6} विमृश्य; T_{1} आक्रुश्य (for वि°). — ^{c}) $D_{1.3}$ स चोन्मत्तः; $G_{3.4}$ तु राजर्षिः (for स्मरन्मातुः). — ^{f}) Dn_{1} पूर्वं (for सर्वं). — After 41, $D_{4-6.8}$ S (T_{4} om.) ins.:

97* रुरुदुर्दुःखसंतप्ता वर्णयन्तः पृथां तदा ।

[$T_{2.3}$ $G_{3.4}$ तथा (for तदा).]

42 T_{4} om. 42 (cf. v. l. 41). — ^{a}) D_{1} तथा (for

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

C. 15. 1054
B. 15. 37. 43
K. 15. 39. 43

प्रादुरासीन्महाराज पृथां श्रुत्वा तथागताम् ॥ ४२
तं च वृद्धं तथा दग्धं हतपुत्रं नराधिपम् ।
अन्वशोचन्त ते सर्वे गान्धारीं च तपस्विनीम् ॥ ४३
तस्मिन्नुपरते शब्दे मुहूर्तादिव भारत ।
निगृह्य बाष्पं धैर्येण धर्मराजोऽब्रवीदिदम् ॥ ४४

इति श्रीमहाभारते आश्रमवासपर्वणि पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

४६

युधिष्ठिर उवाच ।
तथा महात्मनस्तस्य तपस्युग्रे च वर्ततः ।
अनाथस्येव निधनं तिष्ठत्स्वस्मासु बन्धुषु ॥ १
दुर्विज्ञेया हि गतयः पुरुषाणां मता मम ।
यत्र वैचित्रवीर्योऽसौ दग्ध एवं दवाग्निना ॥ २
यस्य पुत्रशतं श्रीमदभवद्बाहुशालिनः ।
नागायुतबलो राजा स दग्धो हि दवाग्निना ॥ ३
यं पुरा पर्यवीजन्त तालवृन्तैर्वरस्त्रियः ।

तदा). — ^{b}) D_9 क्रंदित- (for रुदित-). D_1 सुमहत्क्रंदितस्ततः. — For 42^{ab}, $D_{4-6.8}$ S (T_4 om.) subst. :

98* अन्तःपुरेषु सुमहांस्ततो रुदितनिस्वनः ।
[T_1 अंतःपुरे च (for °रेषु).]

— ^{c}) K_4 महान्नादः; $G_{1.5}$ $M_{1.3.4}$ पु(M_1 सु)रस्त्रीणां; M_2 पुरंध्रीणां (for महाराज). — ^{d}) K_2 तथा मृतां (for तथागताम्). K_4 पृथ्योः श्रुत्वा तथाविधिं (sic).

43 ^{a}) $D_{4-6.8}$ T_{1-3} G_{2-4} तपो-; T_4 ततो (for तं च). D_3 transp. वृद्धं and दग्धं. K_4 तदा; D_5 $T_{1.4}$ G_3 ततो (for तथा). K_1 तव पुत्रां तथा दग्धां (sic). — ^{b}) K_3 जनाधिपं; K_4 यथागतं; $D_{4-6.8}$ S वनेचरं (for नराधिपम्). K_1 हतपुत्रवराधिपं. — ^{c}) B_5 $D_{1.3}$ अनुशोचंत. K_1 तं पूर्वे (for ते सर्वे). G_1 अन्वशोचंस्ततः सर्वे. — ^{d}) $D_{1.4-6.8}$ T_{2-4} G M यशस्विनीं (for तप°). $K_{4.5}$ गांधारी च यश(K_5 तप)स्विनी.

44 ^{b}) D_5 T_4 एव (for इव). — ^{c}) K_4 चास्त्रं; B_2 बास्पं (for बाष्पं). — ^{d}) T_1 विललाप युधिष्ठिरः.

Colophon. — *Adhy. name :* T_3 धृतराष्ट्रमोक्षकथनं. — *Adhy. no.* (figures, words or both) : K_2 D_1 39 ; K_4 T_1 43 ; K_5 $D_{4.6.8}$ T_2 $G_{1.2.5}$ M_{1-4} 44 ; Dn_2 D_7 37 ; D_5 $T_{3.4}$ $G_{3.4}$ 45 (as in text) ; M_5 46. — *Śloka no.:* K_5 53 ; D_9 45.

46

☞ This adhy. is missing in $Ś_1$ B_3 (cf. v. l. 15. 3. 3 ; 22. 1).

1 ^{a}) G_1 कुतो; M_1 कथं; M_3 यथा (for तथा). — ^{b}) T_3 अग्रे (for उग्रे). $K_{4.5}$ प्र- (for च). $D_{4-6.8}$ S तस्थुषः (for वर्ततः). — ^{c}) $K_{1.5}$ B_6 $D_{1.2.7.9}$ वचने; $B_{1.2.4.5}$ Dn D_3 च (B_2 हि) वने (for निधनं). — ^{d}) K_5 D_6 तिष्ठत्स्वात्मासु बंधुषु (sic).

2 ^{a}) K $B_{1.2.4-6}$ Dn $D_{1-3.7.9}$ मतिर्ब्रह्म(K_4 °विद्व)न् (for हि गतयः). — ^{b}) $K_{1.4}$ $B_{1.2.4-6}$ Dn $D_{1-3.7.9}$ मतिर्मम; K_2 सदानघ; G_1 बतानघ; M_3 मतं मम (for मता मम). — T_4 om. 2^{cd}. — ^{c}) K_{2-5} $G_{1.5}$ $M_{2.4}$ [ऽ]पि; $D_{4-6.8}$ $T_{1.2}$ $G_{2.4}$ $M_{1.3.5}$ हि; T_3 वा (for ऽसौ). — ^{d}) K_4 B_4 D_9 दग्ध एव; K_4 (also) नृप एव; $D_{4.6.8}$ $T_{2.3}$ G_4 दह्यतैवं; G_2 दह्यतेयं; G_3 M_5 दह्यते(M_5 °तै)व (for दग्ध एवं). $K_{1.3.5}$ $B_{1.2.4.6}$ Dn $D_{1-3.7.9}$ वनाग्निना; K_2 स पार्थिवः (for दवाग्निना). D_6 T_1 दह्यते स्म (T_1 °त्येवं) वनाग्निना; G_1 दंड्य एवं वनाग्निना.

3 $K_{2.3}$ om. (hapl.) 3. — ^{a}) D_5 (before corr.) यत्र (for यस्य). — ^{b}) K_1 अनयद् (for अभवद्). K_1 $D_{4.6.8}$ $T_{1.4}$ G_1 -शालिनां; T_2 $G_{2.4.5}$ M_{2-5} -षाळिनां;

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तं गृध्राः पर्यवीजन्त दावाग्निपरिकालितम् ॥ ४
सूतमागधसंघैश्च शयानो यः प्रबोध्यते ।
धरण्यां स नृपः शेते पापस्य मम कर्मभिः ॥ ५
न तु शोचामि गान्धारीं हतपुत्रां यशस्विनीम् ।
पतिलोकमनुप्राप्तां तथा भर्तृव्रते स्थिताम् ॥ ६
पृथामेव तु शोचामि या पुत्रैश्वर्यमृद्धिमत् ।
उत्सृज्य सुमहद्दीप्तं वनवासमरोचयत् ॥ ७
धिग्राज्यमिदमस्माकं धिग्बलं धिक्पराक्रमम् ।
क्षत्रधर्मं च धिग्यस्मान्मृता जीवामहे वयम् ॥ ८

सुसूक्ष्मा किल कालस्य गतिर्द्विजवरोत्तम ।
यत्समुत्सृज्य राज्यं सा वनवासमरोचयत् ॥ ९
युधिष्ठिरस्य जननी भीमस्य विजयस्य च ।
अनाथवत्कथं दग्धा इति मुह्यामि चिन्तयन् ॥ १०
वृथा संतोषितो वह्निः खाण्डवे सव्यसाचिना ।
उपकारमजानन्स कृतघ्न इति मे मतिः ॥ ११
यत्रादहत्स भगवान्मातरं सव्यसाचिनः ।
कृत्वा यो ब्राह्मणच्छद्म भिक्षार्थी समुपागतः ।
धिगग्निं धिक्च पार्थस्य विश्रुतां सत्यसंधताम् ॥ १२ C. 15. 1069 B. 15. 36. 13 K. 15. 40. 13

M_1 -षालि च (for -शालिनः). — ^{c}) $K_{4.5}$ T_3 $G_{1.5}$ M_{1-4} -समप्राणः ; B_5 -बलो ** ; D_5 $T_{1.2.4}$ G_{2-4} -बलप्रा(G_4 °त्रा)णः ; M_5 -बलाः प्राणाः (for -बलो राजा). $D_{4.6.8}$ नागानामयुतप्राणः. — B_5 om. 3^d. — ^{d}) $B_{2.4}$ (marg.) वनाग्निना (for दवा°).

4 = (var.) 11. 17. 13 ; 24. 22. — ^{a}) MSS. पर्यबीजंत ; $T_{2.3}$ $G_{3.4}$ °वीज्यंत (for °वीजन्त). K_2 यमेनं पर्युपासंते. — ^{b}) D_5 G_3 वालवृंतैर् ; T_3 ताळ° (for ताल°). K_3 सहस्रशः ; K_4 G_3 इव स्त्रियः (for वरस्त्रियः). — ^{c}) $D_{4.6.8}$ G_2 transp. तं and गृध्राः. K_1 M_3 पर्यबीजंत ; K_2 °वर्तंत ; K_4 °ज्यंजंत ; T_2 $G_{3.4}$ पर्यवीज्यंत (for °वीजन्त). — ^{d}) T_1 G_1 दवाग्नि-. K_1 -कल्पितं ; $B_{1.5}$ -वासितं ; B_6 -पालितं ; $D_{1.3}$ G_1 -वारितं (for -कालितम्). $D_{4-6.8}$ T_{2-4} G_{2-4} M_5 द(D_4 T_4 दा)-वाग्निप्रतिकूलितं ; G_5 M_{1-4} दवाग्निपरिवेष्टितं.

5 = (var.) 11. 17. 12. — ^{a}) G_1 -सर्वैश्च ; G_5 M_{1-4} -संघैर्यः (for -संघैश्च). K_1 सूतमागदसंगैश्च (sic). — ^{b}) $D_{1.4-6.8}$ T G_{2-4} शयने (for शयानो). G_1 परि- ; G_5 M_{1-4} प्रति- (for यः प्र-). K_1 $B_{5.6}$ -बुध्यते ; K_{2-5} -बोधितः (for -बोध्यते). — ^{c}) K_2 धरिण्यां. — ^{d}) K_3 कर्मणा ; K_4 B_4 °णः (for °भिः). $D_{4-6.8}$ S विकृष्टो ($D_{4.6.8}$ G_2 निकृष्टे ; M_4 निकृष्टो ; M_5 विसृष्टो) गृध्रवायसैः.

6 ^{a}) K_1 $B_{1.2.4-6}$ Dn $D_{1-3.7.9}$ T_3 न च ; $D_{4.6.8}$ ननु (for न तु). — ^{b}) K_{3-5} तपस्विनीं (for यश°). — ^{c}) B_6 सतिलोकम् (sic) ; G_1 पुत्रशोकम् (for पतिलोकम्). D_1 अथ (for अनु-). — ^{d}) T_1 G_1 भर्तृमते ; T_3 °व्रत- (for °व्रते). K_2 रतौ ; K_{3-5} G_5 M_{1-4} रतां (for स्थिताम्). — After 6, K_4 reads from 17 to 47. 7*.

7 ^{a}) K_1 $B_{2.5}$ Dn $D_{1-3.7}$ च ; $K_{3.4}$ [अ]नु- ; K_5 [अ]भि- (for तु). — ^{b}) D_8 damaged. B_6 उत्तमं ; T_4 damaged (for ऋद्धिमत्). M_4 पुत्रैश्वर्यसमृद्धिमत्. — ^{c}) $G_{3.4}$ सुमहा- (for सुमहद्).

8 T_1 G_3 M_3 om. (hapl.) 8–9. — ^{a}) K_1 अस्माभिर् (for °कं). — ^{b}) D_4 चास्माकं ; D_8 पौरुषं (for बलं धिक्). — G_1 om. 8^c–9^b. — ^{c}) T_2 ह्यस्मान् ; G_4 यास्मिन् ; G_5 $M_{1.2.4}$ तस्मात् (for यस्मान्). — B_5 om. 8^d. — ^{d}) G_5 $M_{1.2.4}$ तां समुत्सृज्य जीवतां.

9 T_1 G_3 M_3 om. 9 ; G_1 om. 9^{ab} (for all, cf. v. l. 8). — ^{a}) D_8 damaged. K_4 सुशूक्ष्मा. $D_{4.6}$ T_{2-4} $G_{2.5}$ $M_{1.2.4}$ लोकस्य (for कालस्य). D_5 G_4 सुसूक्ष्माखिललोकस्य ; M_5 °क्ष्मा कलधोतस्य (sic). — ^{c}) D_5 इदमुत्सृज्य (for यत्स°). D_4 om. राज्यं. G_1 उत्सृज्य पुत्रान्राज्यं सा.

10 ^{b}) K_3 हि (for च). — ^{c}) $D_{4.6.8}$ $T_{2.3}$ G_{2-5} $M_{1-3.5}$ दह्येद् ; T_4 वह्नेर् (for दग्धा). K_4 अनाथदग्धावक्तव्यम् (sic). — ^{d}) D_5 चेति (for इति). K_4 गुह्यामि ; $D_{4.6.8}$ G_2 बुद्ध्या वि- (for मुह्यामि).

11 B_5 om. 11^a. For 11^{ab}, cf. 1. 214–219. — ^{a}) D_8 partly damaged. $K_{3.4}$ तथा ; G_1 अथ (for वृथा). $K_{1.4}$ $B_{1.2.4.6}$ Dn $D_{1-3.5.7.9}$ T_1 संतर्पितो (for संतोषितो). — M_1 reads 11^{cd} after 12^{cd}. — ^{c}) $D_{4.6.8}$ M_2 स्म (for स).

12 For 12^{ab}, cf. 1. 215. 2. — ^{a}) B_5 यदा (for यत्र). — ^{c}) K_5 ब्राह्मणात् (for °ण-). — ^{d}) D_8 damaged. $D_{1.4-6}$ S (except M_4) भैक्षार्थी (for भि°). $D_{1.3.9}$ $G_{3.4}$ तमुपागतः ; $G_{1.5}$ M_{1-3} समुपस्थितः (for °पागतः). — After 12^{cd}, M_1 reads 11^{cd}. — ^{e}) $K_{1.5}$ पार्थं च (for पार्थस्य). — ^{f}) D_5 तस्य (for सत्य-).

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

C. 15. 1069
B. 15. 38. 13
K. 15. 40. 13

इदं कष्टतरं चान्यद्भगवन्प्रतिभाति मे ।
वृथाग्निना समायोगो यदभूत्पृथिवीपतेः ॥ १३
तथा तपस्विनस्तस्य राजर्षेः कौरवस्य ह ।
कथमेवंविधो मृत्युः प्रशास्य पृथिवीमिमाम् ॥ १४
तिष्ठत्सु मन्त्रपूतेषु तस्याग्निषु महावने ।
वृथाग्निना समायुक्तो निष्ठां प्राप्तः पिता मम ॥ १५
मन्ये पृथा वेपमाना कृशा धमनिसंतता ।
हा तात धर्मराजेति समाक्रन्दन्महाभये ॥ १६
भीम पर्याप्नुहि भयादिति चैवाभिवाशती ।
समन्ततः परिक्षिप्ता माता मेऽभूद्दवाग्निना ॥ १७
सहदेवः प्रियस्तस्याः पुत्रेभ्योऽधिक एव तु ।
न चैनां मोक्षयामास वीरो माद्रवतीसुतः ॥ १८
तच्छ्रुत्वा रुरुदुः सर्वे समालिङ्ग्य परस्परम् ।
पाण्डवाः पञ्च दुःखार्ता भूतानीव युगक्षये ॥ १९
तेषां तु पुरुषेन्द्राणां रुदतां रुदितस्वनः ।
प्रासादाभोगसंरुद्धो अन्वरौत्सीत्स रोदसी ॥ २०

इति श्रीमहाभारते आश्रमवासिकपर्वणि षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

K_1 B_5 विश्रुता सत्यसंधता. — After 12, $D_{1.3}$ ins.:

99* दहते मातरं मह्यं यस्य ते गतिरीदृशी ।

13 B_6 om. 13^a. — ^{a}) $G_{3.4}$ नष्टतरं (for कष्ट°). D_5 वापि; T_3 चास्य (for चान्यद्). — ^{b}) M_2 मां; M_{3-5} मा (for मे). — K_5 om. 13^c–15^b. — ^{c}) D_5 पृथाग्निना; T_1 G_1 दवाग्निना; M_2 पृथयाग्नि- (for वृथाग्निना). K_1 समं योगो; K_4 समायोगे; T_2 °योगं (for °योगो). — ^{d}) $K_{1.3.4}$ G_5 M_2 पृथिवीपते.

14 K_5 om. 14 (cf. v. l. 13). — ^{a}) D_8 damaged. K_2 B_4 वृथा; T_3 तदा (for तथा). T_1 तथा तदा तपस्विनो. — ^{b}) $K_{2.4}$ $B_{2.6}$ D_{3-8} T G_{2-4} M_5 च (for ह). — ^{c}) K_{2-4} $D_{6.8}$ T_2 $M_{3.5}$ एवं गतो; D_4 एवंगमो; T_1 एवं गतं; G_5 $M_{2.4}$ एवागतो; M_1 एतादृशो (for एवंविधो). D_5 $T_{1.4}$ G_{2-4} कथमेवं गतो (T_1 °वंगतं) मृत्युं; G_1 अथ मे संगतो मृत्युं. — D_4 om. 14^d–16^a. — ^{d}) K_1 पृशस्य (sic) (for प्रशास्य).

15 K_5 om. 15^{ab} (cf. v. l. 13). D_4 om. 15 (cf. v. l. 14). — ^{a}) K_4 मंत्रदूतेषु (for °पूतेषु). — ^{b}) K_1 तथा (for तस्य). B_4 महामुने (for °वने). K_4 हुतवैकारिकाग्निषु. — ^{c}) $D_{5.6.8}$ S (except M_4) स वृथा(G_1 °द्धा)ग्नि- (for वृथाग्निना). — ^{d}) D_8 damaged.

16 D_4 om. 16^a (cf. v. l. 14). K_2 om. 16. — ^{a}) D_5 $T_{1.4}$ G_3 वने; D_8 damaged; G_1 मान्या (for मन्ये). K_1 B_4 वृथा (for पृथा). — ^{b}) D_1 -संमिता (for -संतता). K_1 कृशा धर्मनिसांतता (sic); K_5 कृषा धमनिसंवृता. — ^{c}) Dn_2 हा तदा; D_6 G_2 हृता तु (for हा तात). — ^{d}) $B_{4.6}$ $D_{3.5}$ T G_{3-5} M_{1-4} मामाक्रंदन् (for समा°). D_1 माक्रंदन्महतो भयात्; $D_{4.6.8}$ $G_{1.2}$ मामाक्रंदन्महाहवे (G_1 °वने; G_2 °दवे).

17 K_4 reads from 17 to 47. 7 after 6. — ^{a}) K_4 पार्थाप्नुहि; D_1 पर्याप्तोसि (for °प्नुहि). G_1 तथा (for भयाद्). K_1 भीम पर्यासभयाश्चैव (sic). — ^{b}) B_5 om. from दिति up to गतः स (in 15. 47. 7^d). D_9 या (for च). K_1 -शंशती; $K_{2.4.5}$ $B_{2.6}$ $D_{1.5.6.8.9}$ $T_{1.4}$ $G_{3.5}$ M -याचती; $T_{2.3}$ $G_{2.4}$ -याचति (for -वाशती). G_1 इति चैषाभियाचते. — For 17^{ab}, D_3 subst.:

100* भीम मां त्राहि दावाग्नेर्भयादित्यभियाचती ।

— ^{d}) K_1 $B_{1.2.4.6}$ Dn $D_{1-3.6.9}$ M_1 [अ]भून्मे (by transp.).

18 For the sequence in K_4, cf. v. l. 17. B_5 om. 18 (cf. v. l. 17). — ^{a}) D_1 सहदेवं (for °देवः). — ^{b}) $D_{4-6.8}$ T $G_{2.4}$ M_5 [ऽ]धिकम्; G_5 $M_{1.2.4}$ चैक (for ऽधिक). K_1 पुत्रेभ्योतिकरावतु (sic). — ^{c}) B_4 योक्षयामास. K_1 नैवात्मा नोक्षयामास (sic). — ^{d}) B_2 माद्रीवती-; G_5 मद्र°.

19 For the sequence in K_4, cf. v. l. 17. B_5 om. 19 (cf. v. l. 17). Before 19, K_5 G_5 ins. वैशंपायनः. — ^{b}) M_3 समासाद्य (for °लिङ्ग्य). — ^{d}) K_1 भूतानेवं (for °नीव). K_5 युगे; $G_{1.5}$ M_{1-4} [आ]युषः (for युग-).

20 For the sequence in K_4, cf. v. l. 17. B_5 om. 20 (cf. v. l. 17). — ^{b}) K_5 रुदितः (for °त-).

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

४७

नारद उवाच ।

नासौ वृथाग्निना दग्धो यथा तत्र श्रुतं मया ।
वैचित्रवीर्यो नृपतिस्तत्ते वक्ष्यामि भारत ॥ १

वनं प्रविशता तेन वायुभक्षेण धीमता ।
अग्नयः कारयित्वेष्टिमुत्सृष्टा इति नः श्रुतम् ॥ २

याजकास्तु ततस्तस्य तानग्नीन्निर्जने वने ।
समुत्सृज्य यथाकामं जग्मुर्भरतसत्तम ॥ ३

स विवृद्धस्तदा वह्निर्वने तस्मिन्नभूत्किल ।
तेन तद्वनमादीप्तमिति मे तापसाब्रुवन् ॥ ४

स राजा जाह्नवीकच्छे यथा ते कथितं मया ।
तेनाग्निना समायुक्तः स्वेनैव भरतर्षभ ॥ ५

एवमावेदयामासुर्मुनयस्ते ममानघ । C. 15. 1083 B. 15. 39. 6 K. 15. 41. 6

K4 B6 रुदतां रुदि(K4 °द)तः पुनः. —c) K1 -संवृद्धा; K2 -संरुद्धान्; K4 B1.2.4.6 Dn2 D1–3.7.9 -संवृद्धो; Bom. ed. -संरुद्धे (for -संरुद्धो). K3 प्रासादाभोगिसंबद्धो; K5 °दान्भोगसंरुद्धान्; Dn1 °दाभोगसंवृद्धो; D4.6 T2.3 G2–4 प्रासादभागसं(D4.6 G2 °गं सं)रुद्धो; M1.3 प्रासादभो(M3 °दो भो)गसं°. —d) K2 अन्वरोत्सीत्स; K5 अन्वरोत्सीद्ध. D4–6.8 S रोदसी सम(T3 °सीमप्य)रुंधत. — After 20, G1.5 M1–4 ins.:

101* अन्योन्यं वीक्ष्य वीक्ष्यैवं स्मृत्वा मातुरुपप्लवम् ।
सेहिरे न महीपाला निपेतुः पृथिवीतले ।
पुनरुत्थाय चालिङ्ग्य रुदन्तो विषमस्वनाः ।
निपेतुः पाण्डवाः शोकाद्धर्मराजस्य पादयोः ।

[(L. 1) G5 M2.3 एव (for एवं). G1 सुखं च राज्ञो गांधार्याः (for the prior half). G1 श्रुत्वा (for स्मृत्वा). — (L. 2) G1 ते सर्वे च (for सेहिरे न). — (L. 3) G1.5 M2.3 -स्वराः (for -स्वनाः). — G1 om. line 4. — (L. 4) M2 निष्पेतुः (for निपेतुः).]

Colophon om. in B5 D4–6.8 T G2–4 M5. — *Adhy. no.* (figures, words or both): K2 41; K4 44; K5 G1.5 M1–4 45; D7 38. — *Śloka no.*: K4 35; D9 22.

47

☞ This adhy. is missing in Ś1 B3 (cf. v. l. 15. 3. 3; 22. 1).

1 B5 om. from 1 up to गतः स (in 7d) (cf. v. l. 15. 46. 17). K4 reads 15. 46. 17 to 47. 7 after 15. 46. 6. D4.6.8 om. the ref. —a) D9 पृथा (for वृथा). —b) K2–5 तात; G1 तत्तु (for तत्र). — T1 om. 1cd. —d) K2–5 पांडव; G1.5 M1–4 तत्त्वतः (for भारत). D4–6.8 T2–4 G2–4 M5 न ते (D5 T4 G3.4 तु) शोच्यो (D5 T4 °च्ये) नराधिप (G3.4 °पः).

2 For the sequence in K4, cf. v. l. 1. B5 om. 2 (cf. v. l. 1). —a) K3 Dn D1 G1.3.5 M3 [अ]नेन (for तेन). —b) K1 -भक्ष्येन; K5 -भक्ष्येण (for -भक्षेण). —d) G3 इव (for इति).

3 For the sequence in K4, cf. v. l. 1. B5 om. 3 (cf. v. l. 1). —a) K2–5 G5 M2–5 तानथो; G1 ते ततस्; G3.4 तु वने (for तु ततस्). D4–6.8 T2.4 G2 याजका(D5 °कां)स्तानथैतस्य; T1 °कास्तावदेतस्य; T3 °कास्तु सदैतस्य; M1 °स्तानथोद्धास्य. —b) K3.4 D5 G1.3 M2 तदाग्निं; K5 तदाग्नीन्; D4.6.8 T2.4 G2 M1 तदाग्निं; D9 तानग्निं; T1 तथाग्नीन्; T3 तथाग्निं; G4 तदग्निर् (for तानग्नीन्). D5 G1 विजने (for निर्जने). —c) G3.4 उत्सृज्य च (for समुत्सृज्य). —d) K2–5 D4–6.8 S ययुर् (for जग्मुर्).

4 For the sequence in K4, cf. v. l. 1. B5 om. 4 (cf. v. l. 1). —a) K2–5 सं- (for वि-). D4.6.8 T2–4 G2.4 तथा (for तदा). —c) K1 ते तद्वनमथादीप्तिम् (sic). —d) K3–5 Dn D1.2 G1.5 M1.2.4.5 ते (for मे). M3 इति तापसमब्रुवन्.

5 For the sequence in K4, cf. v. l. 1. B5 om. 5 (cf. v. l. 1). —a) T3 राजन् (for राजा). Dn D2 -कक्षे; T1 -तीरे (for -कच्छे). —b) T1 यथावत् (for यथा ते). —d) K4 तेनैव; D3.4 स राजा (for स्वेनैव).

6 For the sequence in K4, cf. v. l. 1. K1 B5 om. 6 (for B5, cf. v. l. 1). —a) T1 इदम् (for एवम्). —b) K2.5 अनघाः. —c) K3 D6–8 T G1–4

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

C. 15. 1083 B. 15. 39. 6 K. 15. 41. 6

ये ते भागीरथीतीरे मया दृष्टा युधिष्ठिर ॥ ६
एवं स्वेनाग्निना राजा समायुक्तो महीपते ।
मा शोचिथास्त्वं नृपतिं गतः स परमां गतिम् ॥ ७
गुरुशुश्रूषया चैव जननी तव पाण्डव ।
प्राप्ता सुमहतीं सिद्धिमिति मे नात्र संशयः ॥ ८
कर्तुमर्हसि कौरव्य तेषां त्वमुदकक्रियाम् ।
भ्रातृभिः सहितः सर्वैरेतदत्र विधीयताम् ॥ ९

वैशंपायन उवाच ।

ततः स पृथिवीपालः पाण्डवानां धुरंधरः ।
निर्ययौ सह सोदर्यैः सदारो भरतर्षभ ॥ १०
पौरजानपदाश्चैव राजभक्तिपुरस्कृताः ।
गङ्गां प्रजग्मुरभितो वाससैकेन संवृताः ॥ ११
ततोऽवगाह्य सलिलं सर्वे ते कुरुपुंगवाः ।
युयुत्सुमग्रतः कृत्वा ददुस्तोयं महात्मने ॥ १२
गान्धार्याश्च पृथायाश्च विधिवन्नामगोत्रतः ।
शौचं निवर्तयन्तस्ते तत्रोषुर्नगराद्बहिः ॥ १३
प्रेषयामास स नरान्विधिज्ञानाप्तकारिणः ।
गङ्गाद्वारं कुरुश्रेष्ठो यत्र दग्धोऽभवन्नृपः ॥ १४

$M_{1.2}$ एते (for ये ते). G_5 M_{1-3} -कूले (for -तीरे). — ^{d}) K_4 मयोद्दिष्टो (for मया दृष्टा).

7 For the sequence in K_4, cf. v. l. 1. B_5 om. up to गतः स (cf. v. l. 1). — ^{a}) K_4 तेन (for स्वेन). G_1 राजन् (for राजा). — ^{b}) $K_{2.4.5}$ $G_{3.4}$ महीपतिः (for °पते). — ^{c}) K_1 शोशिथास् (sic); K_5 शोचिस्मास् (sic); B_4 °तास्; D_5 $T_{2.3}$ G_{2-4} शोचथास्; M_5 शोचता (for शोचिथास्). $K_{2.3.5}$ D_9 T_2 तं (for त्वं). $D_{4.8}$ नृपते; D_6 G_2 °तिर् (for °तिं). K_4 मा शोचेथा नरपतिं; T_1 मा शुचस्त्वं नरपते; G_1 तं मा शोच नृपतिं; G_5 M_{1-4} मा शोचिष्ठाः कुरुश्रेष्ठ. — ^{d}) K_1 तपसा; G_1 गतः सन् (for गतः स).

8 ^{a}) D_7 कुरु- (for गुरु-). — ^{b}) K_1 $B_{1.2.4-6}$ Dn $D_{1-3.7.9}$ जननी ते जना($B_{2.6}$ $D_{1.3.9}$ नरा)धिप. — ^{c}) M_1 तु (for सु-). K_1 प्राप्ता सुमहती सिद्धिर्; $D_{4-6.8}$ T $G_{2.3}$ गतिं प्राप्ता सुमहतीम्; G_4 गतिं प्राप्ता वसुमतीम्. — ^{d}) $D_{4-6.8}$ T G_{2-5} M_{1-3} नास्ति (for नात्र).

9 ^{a}) $K_{1.5}$ $B_{1.2.4-6}$ Dn $D_{1-3.7.9}$ राजेंद्र; $D_{4.6.8}$ G_2 धर्मज्ञ (for कौरव्य). — ^{b}) $K_{3.4}$ शेषां (for तेषां). B_6 तु ह्युदक-; G_1 चैवोदक-; M_4 तामुदक- (for त्वमुदक-). T_4 -क्रियाः. — ^{c}) K_1 सहितैः (for °तः). — ^{d}) K_1 विधेयतां (sic); $K_{2.3.5}$ $D_{4-6.8}$ S विधीयते (for °यताम्). — After 9, T_1 ins. an addl. colophon [*Adhy. no.* 44].

10 ^{a}) T_1 $M_{2.5}$ पृथिवीपाल. — ^{b}) K_1 च नारदः (for धुरंधरः). G_1 कुरुराजो युधिष्ठिरः. — ^{c}) K_2 निर्ययुः. $K_{1.3}$ $B_{1.2.4-6}$ Dn $D_{1-3.7.8}$ निर्ययुः सहसोदर्यः. — ^{d}) T_2 सदारैर्. K $B_{1.2.4-6}$ Dn $D_{1-3.7.9}$ सदारश्च नरर्षभ (B_2 °भं); B_5 °रश्च नराधिपः.

11 ^{a}) M_4 पौराः सह ययुः सर्वे. — ^{b}) K_5 राजन् (for राज-). K_2 -समन्विताः; K_5 -समायुताः (for -पुरस्कृताः). $K_{3.4}$ राजभक्तिं समाश्रिताः; $D_{4-6.8}$ T G_{2-5} M_{2-5} °भक्तिमुपा(G_5 M_2 °मुता)श्रिताः. — ^{d}) $G_{3.4}$ व्यासेन (sic) (for वाससा).

12 T_4 om. 12–14. — ^{a}) K_4 वि- (for ऽव-). B_1 Dn_1 सलिले (for °लं). — ^{b}) T_1 सर्वे तु; $G_{1.5}$ M_{1-4} ते सर्वे (by transp.). K_1 $B_{1.2.4.5}$ Dn $D_{2.3.7}$ नर- (for कुरु-).

13 T_4 om. 13 (cf. v. l. 12). B_6 om. 13–14. — ^{a}) K_1 पृथा चान्या (for पृथायाश्च). K_{2-5} गांधार्यै च पृथायै च; T_3 °र्याश्चापि विधिवत्. — ^{b}) T_3 पृथाया (for विधिवन्). — D_8 om. 13^{cd}. — ^{c}) K_4 $D_{4.6}$ G_2 शोकं (for शौचं). $D_{1.2}$ T_1 $G_{1.2.5}$ M निर्वर्तयंतस्. K_1 तु (for ते). — ^{d}) $K_{2.3.5}$ D_{4-6} T_{1-3} G_{2-5} M_{1-3} तदोपुर्; K_4 ततो° (for तत्रोषुर्).

14 B_6 T_4 om. 14 (cf. v. l. 13, 12). — ^{a}) K_{2-5} $D_{4-6.8}$ S (T_4 om.) च; B_4 om. (for स). D_1 नगराद्; D_5 T_1 चरान्; $G_{1.5}$ M_{1-4} तदा (for नरान्). — ^{b}) T_1 विविधानाप्तकारिणः; G_1 विधिना ह्याप्त°; G_2 विधिज्ञानार्त°. — 14^{cd} partly damaged in D_4. — ^{c}) $D_{5.6.8}$ T_{1-3} G_{2-4} M_5 -द्वारे (for -द्वारं). K_1 $B_{1.4.5}$ Dn $D_{2.7}$ नरश्रेष्ठो (K_1 °ष्ठ) (for कुरु°). — ^{d}) G_1 महीपतिः; G_2 [ऽ]भवन्नृप.

15 ^{a}) $B_{1.5}$ Dn $D_{2.7}$ कृत्यानि; $D_{4.6.8}$ तुल्यानि; D_5 T_3 शल्यानि; $T_{1.4}$ कल्याणे (for कुल्यानि). — ^{b}) G_1 [ऽ]वदंस्; G_4 [ऽ]न्वयात्; M_1 °गात् (for °शात्). — ^{c}) $G_{3.4}$ कर्तव्यादीनि (for °नीति). — ^{d}) $K_{2.5}$ तदा देशान्; K_4 दत्त्वा दामान्; G_1 यत्र दग्धो; $G_{3.4}$

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्रैव तेषां कुल्यानि गङ्गाद्वारेऽन्वशात्तदा ।
कर्तव्यानीति पुरुषान्दत्तदेयान्महीपतिः ॥ १५
द्वादशेऽहनि तेभ्यः स कृतशौचो नराधिपः ।
ददौ श्राद्धानि विधिवद्दक्षिणावन्ति पाण्डवः ॥ १६
धृतराष्ट्रं समुद्दिश्य ददौ स पृथिवीपतिः ।
सुवर्णं रजतं गाश्च शय्याश्च सुमहाधनाः ॥ १७
गान्धार्याश्चैव तेजस्वी पृथायाश्च पृथक्पृथक् ।
संकीर्त्य नामनी राजा ददौ दानमनुत्तमम् ॥ १८
यो यदिच्छति यावच्च तावत्स लभते द्विजः ।
शयनं भोजनं यानं मणिरत्नमथो धनम् ॥ १९
यानमाच्छादनं भोगान्दासीश्च परिचारिकाः ।
ददौ राजा समुद्दिश्य तयोर्मात्रोर्महीपतिः ॥ २०
ततः स पृथिवीपालो दत्त्वा श्राद्धान्यनेकशः ।
प्रविवेश पुनर्धीमान्नगरं वारणाह्वयम् ॥ २१
ते चापि राजवचनात्पुरुषा ये गताभवन् ।
संकल्प्य तेषां कुल्यानि पुनः प्रत्यागमंस्ततः ॥ २२ C. 15. 1069 B. 15. 39. 22 K. 15. 41 22

तत्तदेयान् (for दत्तदेयान्). K5 महीपते.

16 G3.4 om. 16^{a}–17^{b}. 16^{ab} partly damaged in D4. — a) M1 om. ऽहनि. K1 स्म; D5.6.8 T2–4 G2.5 M च (for स). — b) B6 कृतशौचं. — c) D1 दानानि (for विधिवद्). T1 श्राद्धानि विधिवद्राजा. — d) K5 D9 M1.3 पांडवाः (M1 °व). K3.4 राजन्दानानि पांडवः.

17 G3.4 om. 17^{ab} (cf. v. l. 16). K3 om. 17–18; K4 reads the same on marg. *sec. m.* — b) K2.5 ददौ स नृपसत्तमः. — c) M1 सुवर्ण- (for °र्णं). K4 गावः (for गाश्च). — d) G3.4 तिलाश् (for शय्याश्). G1.5 M2.3 शयनानि महाधनान् (G1 °नं); M1 शयनानि महांति च.

18 K3 om. 18 (cf. v. l. 17). K4 reads 18 on marg. — a) K2.5 D4–6.8 T G2–4 M5 चापि (for चैव). — After 18^{ab}, M1 ins.:

102* बहुनि चैव रत्नानि वासांसि विविधानि च ।
महार्हाणि विचित्राणि ददौ कौरवनन्दनः ।

— c) K4 नामना (for °नी). T1 संकीर्त्य नामगोत्राणि; G1 राजा संकीर्त्य नामानि. — d) G3 धनम् (for दानम्). D1 ददौ दानसमुद्भवं. — For 18^{cd}, K2.5 subst.:

103* संकीर्त्य नामानि ददौ राजन्दानानि पार्थिवः ।

19 a) K4 यो यो यत्रैव तावच्च. — b) K1 G1 च (for स). K1 B1.5 Dn D2.7 नरः (for द्विजः). — For 19^{ab}, T1 subst.:

104* यावदिच्छन्ति विप्रास्तु तावन्ति प्राप्नुयुर्द्विजाः ।

— c) K1 B1.4.6 Dn2 D9 पानं; K4 दानं (for यानं). — d) T1 बहु- (for मणि-). D4.6.8 G2 च भो(G2 भा)जनं; G1 तथा धनं; G3.4 अथोदनं; M3 महाधनं (for अथो धनम्).

20 a) K1 D4–6 T1–3 G2–5 M1–3 पानम्; T4 दानम् (for यानम्). D9 भोग्यं; G2 भोगं (for भोगान्). — b) K2 दासाश् (for दासीश्). K3.4 तु (for च). D4–6.8 T1.3 G1.2 M3–5 -चारकाः (for -चारिकाः). K1 B1.2.4–6 Dn D1–3.7.9 दासीश्च समलंकृताः. — c) K4 ददौ राजानमुद्दिश्य. — d) K4 मात्रे; D4.6 भ्रात्रोर् (sic) (for मात्रोर्). K2.3 D5 T2.4 महीपते; D4.6.8 G2 °पतेः (for °पतिः). G1 ततो मात्रे महीपतिः; G5 M1–3 ततो मात्रो [°त्रे] महीपते.

21 c) G1.5 M2.3 पुरीं; M1.4.5 पुरं (for पुनर्). K1 B1.2.4–6 Dn D1–3.7.9 प्रविवेश पुरं (B6 °रा) राजा; K5 °वेश पुरीं विद्वान्. — d) K2–5 B2 D4–6.8 S पुरं वा(B2 G5 M °नर्वा)रणसाह्वयं; D1 नगरं नागसा(marg. वारणा)ह्वयं. — After 21, G1.5 M1–4 ins.:

105* सिक्तसंमार्जितपथं पताकातोरणोच्छ्रितम् ।
हृष्टपुष्टजनाकीर्णं पुरं तेषां प्रवेशने ।

[(L. 2) G1 मृष्ट- (for हृष्ट-). G1 पताकाध्वजशोभितं; G5 M2 प्रविवेश पुरं महत् (for the post. half).]

22 a) K2 तदा (for ते च). — b) K4.5 G1 यो (for ये). K4 G1 गतस् (for गता). G1.5 M1–3 ततः (for [अ]भवन्). — After 22^{ab}, G1.5 M1–4 ins.:

106* धृतराष्ट्रस्य गान्धार्याः कुन्त्याश्चक्रुश्च संघशः ।
गङ्गाद्वारे शुभे पुण्ये यथोद्दिष्टं महात्मना ।

[(L. 1) M4 संचयः (for संघशः). G1 कुंत्याश्च भरतर्षभ; G5 M2 °श्च निधनक्षये; M3 °श्चाथ प्रचक्रिरे (for the post. half).]

— D6.8 T2 G2 read 22^{cd} twice. — c) G3.4 M6 संकाल्य (for संकल्प्य). D6.8 G2 (all both times) M1.4 कृत्वा (for तेषां). D6.8 (both first time)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

C. 15. 1100
B. 15. 39. 23
K. 15. 41. 23

माल्यैर्गन्धैश्च विविधैः पूजयित्वा यथाविधि ।
कुल्यानि तेषां संयोज्य तदाचख्युर्महीपतेः ॥ २३
समाश्वास्य च राजानं धर्मात्मानं युधिष्ठिरम् ।
नारदोऽप्यगमद्राजन्परमर्षिर्यथेप्सितम् ॥ २४
एवं वर्षाण्यतीतानि धृतराष्ट्रस्य धीमतः ।
वनवासे तदा त्रीणि नगरे दश पञ्च च ॥ २५
हतपुत्रस्य संग्रामे दानानि ददतः सदा ।
ज्ञातिसंबन्धिमित्राणां भ्रातॄणां स्वजनस्य च ॥ २६
युधिष्ठिरस्तु नृपतिर्नातिप्रीतमनास्तदा ।
धारयामास तद्राज्यं निहतज्ञातिबान्धवः ॥ २७

इति श्रीमहाभारते आश्रमवासपर्वणि सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ नारदागमनपर्व समाप्तम् ॥

॥ समाप्तमाश्रमवासिकं पर्व ॥

तुल्यानि; T_{2} (second time) कार्याणि; T_{4} कल्याणि (for कुल्यानि). D_{5} T_{3} संकाल्य तेषां (T_{3} कृत्वा) शल्यानि; G_{1} संकल्पकृतकुल्यानि; G_{5} $M_{2.3}$ °ल्पयित्वा कु°. ❀ Cn: संकल्प्य एकीकृत्य, कुल्यानि अस्थीनि, प्रत्यागमन्, गङ्गामिति शेषः । संयोज्य गङ्गयेति शेषः । ❀ — The word कुल्य, in the context denotes a receptacle for bones. — ^{d}) K_{1} प्रत्यागमत्; $K_{4.5}$ °गमस्; T_{2} (first time) पुन्यागमंस् (sic). K_{2-5} तदा (for ततः). $D_{4.6.8}$ T_{2} G_{2} (last four second time) $M_{1.4}$ निवापानि च सर्वशः; T_{3} सवनानि च सर्वशः; G_{1} M_{3} ते चापि न्यवसन्सुखं; G_{5} M_{2} ते चापि परिमार्जनं.

23 ^{b}) K_{1} $B_{1.2.4-6}$ Dn $D_{1-3.7.9}$ T_{1} M_{5} अर्चयित्वा (for पूज°). $K_{1.5}$ यथा विधिः; G_{1} महात्मनः. — ^{c}) K_{2} पुण्यानि; D_{5} T_{3} शल्यानि; T_{4} कल्याणि (for कुल्यानि). K_{3} D_{1} संयुज्य (for संयोज्य). — ^{d}) D_{9} तदा चक्रुर्. M_{1} महीपते. K_{2} ते प्रचख्युर्महीपते; $K_{3.4}$ तदा चक्रुर्महीपतिः (K_{4} °ते); B_{2} तदाचक्षुर्महीपतिः (sic).

24 ^{a}) K_{1} $B_{1.2.4.5}$ Dn $D_{2.3.7.9}$ तु (for च). K_{2} स समाश्वास्य राजानं. — ^{c}) $D_{4-6.8}$ $T_{1.2.4}$ G_{2-5} $M_{1.2}$ प्रीतः (for राजन्). T_{3} G_{1} M_{3} नारदोभ्य(M_{3} °दोत्य)गमत्प्रीतः. — ^{d}) G_{1} स देवर्षिर् (for परमर्षिर्). — After 24, $K_{2.3.5}$ ins.:

107* द्वारकायां ततः कृष्णं वासुदेवं जनार्दनम् ।
अनादिनिधनं विष्णुं शङ्खचक्रगदाधरम् ।
रहस्यकथने युक्तं नारायणमनामयम् ।

[(L. 1) $K_{3.5}$ तदा द्रष्टुं (for ततः कृष्णं). K_{5} देवदेवं (for वासु°). — (L. 3) $K_{3.5}$ युक्तो (for युक्तं).]

25 ^{a}) K_{2} पंच (for एवं). — ^{b}) T_{3} धृतराष्ट्रमहीपतेः. — ^{c}) K_{1} $B_{1.4.5}$ Dn $D_{1.2.7.9}$ $T_{1.3}$ $G_{3.4}$ तथा (for तदा).

26 ^{b}) K_{4} $D_{1.3}$ G_{1} तदा (for सदा). — ^{c}) $D_{4-6.8}$ S नृपतेः (M_{4} ददतः) पुत्रपौत्राणां. — ^{d}) $D_{4-6.8}$ S मित्राणां (for भ्रातॄणां). G_{1} च (for स्व-).

27 ^{a}) D_{3} च; M_{2} स (for तु). T_{2} नृपते. — ^{b}) K_{1} राजा (for नाति-). $K_{1.3.5}$ $B_{2.4}$ D_{9} G_{1} M_{4} -प्रीतिमनास् (for -प्रीत°). $T_{2.3}$ तथा (for तदा). M_{1} सह भ्रातृभिरच्युतः. — ^{c}) $K_{2.3.5}$ D_{3} T_{1} $G_{3.4}$ कारयामास; T_{3} पाल°; G_{1} शास° (for धार°). K_{1} तद्राष्ट्रं. — ^{d}) $K_{3.4}$ विगत- (for निहत-). K_{2-5} D_{5} $T_{1.4}$ $G_{1.3.4}$ M_{2} -बांधवं (for -बान्धवः). — After 27, $D_{2.7}$ Cal. ed. ins.:

108* तथाश्रमवासिके तु पर्वण्यपि समाहितः ।
गन्धमाल्यादियुक्तं च हविष्यं भोजयेद्द्विजान् ।

Colophon. — *Adhy. name:* K_{3} श्राद्धक्रिया; T_{4} धृतराष्ट्रश्राद्धकरणं; M_{3} युधिष्ठिरसमाश्वासनं. — *Adhy. no.* (figures, words or both): K_{2} 42; K_{4} $D_{4.6.8}$ $T_{1.2}$ G_{2} 45; K_{5} D_{5} $T_{3.4}$ $G_{1.3-5}$ M_{1-4} 46; B_{4} Dn_{2} D_{7} 39; M_{5} 40. — *Śloka no.:* K_{4} 75; D_{9} 27.

After the last colophon, K_{1} concludes with:

समाप्तं आश्रमवासिकपर्व । शुभम् । शुभम् ।

K_{2} concludes with:

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति आश्रमवासिके पर्वणि संपूर्णं ॥ संवत् १८२८ ॥ शाके १६९३ मिति ज्येष्ठकृष्ण ३ गुरुवासरे । लिपिकृतं मिश्र भगवानवासी आभांनेरिको·

K3 concludes with :

समाप्तं चाश्रमवासिकं पर्व ॥ १५ ॥ अथ मौसलं । तस्यायमाद्यः श्लोकः ॥

महर्षिणाभ्यनुज्ञातो व्यासेनाद्भुतकर्मणा ॥ २

वैशंपायन उवाच ।

स्वर्गं त्रिविष्टपं प्राप्य तव पूर्वपितामहाः ।
युधिष्ठिरप्रभृतयो यदकुर्वत तच्छृणु ॥ ३
स्वर्गं त्रिविष्टपं प्राप्य धर्मराजो युधिष्ठिरः ।
दुर्योधनं श्रिया जुष्टं ददर्शासीनमासने ॥ ४
भ्राजमानमिवादित्यं वीरलक्ष्म्याभिसंवृतम् ।
देवैर्भ्राजिष्णुभिः साध्यैः सहितं पुण्यकर्मभिः ॥ ५
ततो युधिष्ठिरो दृष्ट्वा दुर्योधनममर्षितः ।
सहसा संनिवृत्तोऽभूच्छ्रियं दृष्ट्वा सुयोधने ॥ ६ C. 18. 6 B. 18. 1. 6 K. 18. 1. 6

The introductory mantra

1* नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ।

is found only in K B_{1-3} Dn $D_{1-4.9}$ G_2. K_{2-5} read व्यासं (for चैव) in the second line.

Before the introductory mantra, K_1 ins. ॐ श्रीगणेशाय नमः । ॐ नमो भगवते वासुदेवाय ।; K_{2-4} $D_{1.2.4}$ श्रीगणेशाय नमः ।; K_5 श्रीगणेशाय नमः ॐ ।; B_1 ॐ नमो गणेशाय ॥; B_2 ॐ नमो भगवते वासुदेवाय । श्रीकृष्णाय ।; D_3 श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः; D_9 ॐ नमः श्रीगोपालगौरीगणपतिभ्यः । .

Of the MSS. which om. the introductory mantra, B_4 begins with: ॐ नमो भगवते वासुदेवाय । श्रीकृष्णाय ।; D_5 with: श्रीगणेशाय नमः ।; D_6 with: हरिः ॐ ।; D_7 with: श्रीः ।; D_8 with: श्रीगुरुचरणकमलेभ्यो नमः ।; T_2 G_3 (both marg.) with: स्वर्गारोहणपर्व ।; T_3 with: श्रीहयग्रीवाय नमः । श्रीसीतारामाभ्यां नमः ।; T_3 (marg.) with: शुभमस्तु । अविघ्नमस्तु । श्रीराम । स्वर्गारोहणपर्व ।; G_3 (marg.) with: हरिः ॐ । स्वर्गारोहणं ।; G_5 with ॐ ।; M_2 with: स्वस्ति । श्रीवेदव्यासाय नमः ।.

1 B_6 om. 1. D_6 om. (hapl.) 1–3. — [a]) D_8 स्वर्ग- (for स्वर्गं). B_{1-4} त्रिपिष्टपं. T_1 G_3 प्राप्ता (for प्राप्य). — [b]) G_1 तव (for मम).

2 D_6 om. 2 (cf. v. l. 1). K_1 om. 2. — [b]) K_4 (marg.) सर्वविद्योसि; K_4 (before corr.) °विच्च ह्यसि; B_2 सर्वविद्ध्यसि; $B_{3.4}$ सर्वविद्ध्यसि; T_3 सर्वमिच्छासि (sic) (for सर्वविच्चासि). B_3 मतिः; B_5 ततः (for मतः). $K_{2.3}$ $D_{5.8}$ G_4 सर्वं वेत्सीति मे मतं (D_5 G_4 °तिः); K_5 सर्वविद्यासि मे मतिः; D_1 सर्वविद्ध्यसि मे मतिः; $T_{1.2}$ सर्वज्ञोसीति मे मतिः; T_4 $G_{1-3.5}$ M सर्वं वि(G_1 $M_{4.5}$ वेत्रि)द्धीति मे मतिः. — After 2[ab], K_3 ins.:

2* न हि तृप्यामि सर्वेषां शृण्वानश्चरितं महत् ।

— [d]) $T_{2.4}$ $G_{1.2.4}$ M_1 अमित- (for अद्भुत-). — After 2, K_3 ins.:

3* भूतं भव्यं भविष्यच्च सर्वं वै वेत्सि तत्त्वतः ।

3 D_6 om. 3 (cf. v. l. 1). — [a]) K_5 स्वर्ग- (for स्वर्गं). B (except B_5) त्रिपिष्टपं. T_4 स्वर्गप्रतिष्ठितं प्राप्य. — [b]) T_2 मम (for तव). K_5 पूर्वे (for पूर्व-). — [d]) K_{3-5} B (except B_5) Dn_2 $D_{2-4.9}$ $G_{3.5}$ $M_{3.5}$ अकुर्वंत. D_8 यदकुर्वंत तद्भण.

4 [a]) K_1 स्वर्गे (for स्वर्गं). B त्रिपिष्टपं. — [c]) $K_{1.2}$ $D_{5.6}$ $T_{1.4}$ G M युक्तं; $K_{4.5}$ $D_{1.9}$ विष्टं (for जुष्टं).

5 [a]) $K_{2.3}$ $D_{6.8}$ T_1 M_5 यथादित्यं; D_6 T_4 $G_{1.2.4.5}$ M_{1-4} महावीरं (D_6 T_4 G_4 M_1 °र्यं); T_2 श्रिया दीप्तं; G_3 यथा दिव्यं (for इवादित्यं). — [b]) M_1 वीक्ष्य (for वीर-). G_4 -लक्ष्म्याति- (for -लक्ष्म्याभि-). — [c]) G_4 देव- (for देवैर्). K_1 साद्यैः; K_2 सख्यैः; G_4 सर्वैः (for साध्यैः). — [d]) B_5 सहितैः (for °तं). D_1 -कर्मिभिः. G_4 सहितं कर्मभिस्तदा.

6 [a]) $D_{5.6}$ $T_{1.2.4}$ G M राजा (for दृष्ट्वा). — [b]) K_4 अमर्षिणं (for °र्षितः). K_1 दुर्योधनसमर्षितः; D_4 युधिष्ठिर अमर्षणः (sic). — [c]) G_4 किंनिमित्तो (for संनिवृत्तो). — [d]) D_9 स्वयं (for श्रियं). $K_{4.5}$ $B_{2.3}$ $D_{1.9}$ प्रेक्ष्य; B_4 वीक्ष्य (for दृष्ट्वा). $K_{1.2}$ $D_{5.6.8}$ S (except T_3) दृष्ट्वा दुर्योधनश्रि(D_8 G_3 °ने श्रि)यं.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

C. 18. 8
B. 18. 1. 7
K. 18. 1. 7

ब्रुवन्नुच्चैर्वचस्तान्वै नाहं दुर्योधनेन वै ।
सहितः कामये लोकाँल्लुब्धेनादीर्घदर्शिना ॥ ७
यत्कृते पृथिवी सर्वा सुहृदो बान्धवास्तथा ।
हतास्माभिः प्रसह्याजौ क्लिष्टैः पूर्वं महावने ॥ ८
द्रौपदी च सभामध्ये पाञ्चाली धर्मचारिणी ।
परिक्लिष्टानवद्याङ्गी पत्नी नो गुरुसंनिधौ ॥ ९
स्वस्ति देवा न मे कामः सुयोधनमुदीक्षितुम् ।
तत्राहं गन्तुमिच्छामि यत्र ते भ्रातरो मम ॥ १०
मैवमित्यब्रवीत्तं तु नारदः प्रहसन्निव ।
स्वर्गे निवासो राजेन्द्र विरुद्धं चापि नश्यति ॥ ११
युधिष्ठिर महाबाहो मैवं वोचः कथंचन ।
दुर्योधनं प्रति नृपं शृणु चेदं वचो मम ॥ १२
एष दुर्योधनो राजा पूज्यते त्रिदशैः सह ।
सद्भिश्च राजप्रवरैर्य इमे स्वर्गवासिनः ॥ १३
वीरलोकगतिं प्राप्तो युद्धे हुत्वात्मनस्तनुम् ।
यूयं सर्वे सुरसमा येन युद्धे समासिताः ॥ १४

---

7 [a]) K_1 वशस् (for वचस्). D_5 स त्वं ; T_1 तत्त्वं ; G_3 तन्वन् ; M_3 तान्यैर् (for तान्वै). K_2 अब्रवीच्च वचस्तान्वै ; K_4 ब्रुवन्वै वर्चयस्तान्वै. — [c]) $D_{5.6}$ T_{1-4} G_{1-4} M सहितः (M_2 °तं) कामयेयं वै. — [d]) D_7 उग्रेण (for लुब्धेन). B_5 दीर्घ- (for [अ]दीर्घ-). K_5 -दर्शना (for -दर्शिना).

8 [a]) D_9 om. सर्वा. K_5 यत्कृते पृथिवीं सर्वाः (sic). — [b]) $K_{1.2}$ हताः (for तथा). — [c]) K_5 हतास्माभिः ; D_6 अहोस्माभिः (for हता°). K_3 प्रगृह्य (for प्रसह्य). $M_{1.3}$ आदौ (for आजौ). K_1 अस्माभिः संप्रयुज्याजौ ; T_1 अस्माभिर्निहतास्त्वाजौ ; G_4 अस्माभिः स प्रसह्याजौ. — [d]) K_4 क्लिष्टाः सर्वे ; D_6 दृष्टैः पूर्वं ; D_9 कीष्टैः पूर्व- (sic) ; T_1 क्लेशपूर्वं ; G_4 क्लिष्टपूर्वं (for क्लिष्टैः पूर्वं). D_4 महद्वनेः (sic) ; D_6 $T_{1.2.4}$ $G_{1-3.5}$ M महाहवे (for °वने).

9 With 9, cf. 2. 61. 40. — [a]) K_1 द्रौपदे च महामध्ये. — [c]) $K_{4.5}$ $B_{1.4.5}$ $D_{1.2.7.9}$ पर्याकृष्टा ; $B_{2.3.6}$ पर्याक्लिष्टा ; Dn $D_{3.4}$ T_3 पर्यकृष्टा (for परिक्लिष्टा). K_1 अनवद्यांगे ; K_2 °ध्यांगी (sic). — [d]) K_5 D_7 पतीनां (for पत्नी नो). K_{1-3} $D_{5.6.8}$ S (except T_3) गु(D_8 T_1 कु)रुमध्ये तप(D_8 यश)स्विनी.

10 [a]) $K_{4.5}$ $B_{1.3.5.6}$ Dn $D_{1-4.7.9}$ T_3 $M_{4.5}$ अस्ति (for स्वस्ति). D_8 T_3 वै (for मे). — [b]) $K_{1.5}$ उपेक्षितुं (K_5 °तं) ; K_3 D_8 अवे° (for उदी°).

11 [a]) $B_{1.5.6}$ Dn D_{1-7} $T_{3.4}$ $G_{1.2.4}$ नैवम् ; B_3 वैरम् (for मैवम्). K_4 तत्र (for तं तु). — [b]) D_6 कौरवः (for नारदः). — $D_{5.6}$ $T_{1.4}$ G M om. 11[cd]. — [c]) D_1 स्वर्गो ; D_7 स्वर्गं. K_5 Dn $D_{2.3.9}$ निवासे ; D_4 °सं (for °सो). — [d]) T_2 लक्ष्यते (for नश्यति). K $B_{2.6}$ $D_{1.7.8}$ विरुद्धस्यापि नश्यति ($K_{1.2}$ D_8 दृश्यते) ; B_1 °मपि पश्यसि ; B_3 विरुद्धसेत्र नश्यति (sic) ; B_4 D_9 T_3 °द्धस्येह (B_4 °स्येव) न°.

12 [b]) $D_{4.6}$ T_4 $G_{1.2.4}$ M_4 नैवं (for मैवं). M_3 वो न (for वोचः). $K_{1.3}$ कदाचन (for कथंचन). K_2 मैवावोचः कथंचन ; D_8 मैव वोचः कदाचन. — [c]) $K_{1.2}$ विभो ; K_3 $D_{5.6.8}$ $T_{1.4}$ G M_{1-3} वचः (for नृपं). — [d]) D_6 T_4 G_1 श्रुत्वा (for शृणु). $D_{5.6}$ $T_{1.2.4}$ G M राजन् (for चेदं). K_3 शृणुम गदतो मम (sic) ; D_8 शृणु मे गदतोनघ.

13 T_1 om. 13[a]–15[b]. — [a]) D_5 G_3 M_5 एवं (for एष). D_8 दुर्योधने (for °धनो). — [b]) K_5 युज्यते ; G_3 पूजितः (for पूज्यते). K_1 T_3 त्रिदिवैः ; D_9 त्रिदिशैर् (for त्रिदशैः). $D_{5.6}$ T_4 तदा ; D_9 अपि ; T_2 $G_{1.2.4.5}$ $M_{1-3.5}$ सदा ; G_3 तथा (for सह). K_3 D_8 त्रिदशैः पूज्यते सदा. — [c]) K_5 षड्भिश्च ; D_6 सभ्यश्च ; G_4 सहैव (for सद्भिश्च). — [d]) D_8 यमिमे ; G_3 यथेमे (for य इमे). G_4 -वासिभिः (for -वासिनः).

14 T_1 om. 14 (cf. v. l. 13). D_8 om. 14–15. — [a]) G_5 $M_{2.4}$ स्वर्ग- (for वीर-). K_2 -लोकां (for -लोक-). B_4 -गतं (for -गतिं). K_2 Dn D_{2-4} $T_{3.4}$ प्राप्ता ; K_4 प्राप्ते (for प्राप्तो). — [b]) $K_{1.2}$ दत्त्वा ; D_9 हत्वा ; T_2 $M_{1.3}$ हित्वा ; T_4 $G_{1.2}$ त्यक्त्वा (for हुत्वा). D_9 सुतं (for तनुम्). K_5 युद्धे हतात्मनस्तनु (sic) ; G_4 ** युक्तात्मानस्तनुं. — [c]) B_2 $D_{5.6.9}$ $T_{2.4}$ G_{1-4} $M_{1.2.4.5}$ युद्धे (for सर्वे). B_3 यूयं सर्वेश्वरसमा. — [d]) D_9 सर्वे येन (for येन युद्धे). $K_{3.4}$ B_3 D_1 समाश्रि(B_3 °स्थि)ताः ; Dn_1 सुशासिताः ; D_6 न धीमतां ; T_2 $G_{1.2.4}$ M_1 न बाधिताः ; T_3 समाहिताः ; T_4 न तापिताः (for समासिताः). K_5 येन युद्धं समाश्रिताः ; Dn_2 D_{2-4} सदैवानेन हिंसिताः ; D_5 $G_{3.5}$ M_{2-5} येन सर्वे समाहि(D_5 G_3 M_5 °ह)ताः.

15 T_1 om. 15[ab] (cf. v. l. 13). D_8 om. 15 (cf. v. l. 14). — [a]) K_5 य (for स). M_3 एष वै (for

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स एष क्षत्रधर्मेण स्थानमेतदवाप्तवान् ।
भये महति योऽभीतो बभूव पृथिवीपतिः ॥ १५
न तन्मनसि कर्तव्यं पुत्र यद्द्यूतकारितम् ।
द्रौपद्याश्च परिक्लेशं न चिन्तयतुमर्हसि ॥ १६
ये चान्येऽपि परिक्लेशा युष्माकं द्यूतकारिताः ।
संग्रामेष्वथ वान्यत्र न तान्संस्मर्तुमर्हसि ॥ १७
समागच्छ यथान्यायं राज्ञा दुर्योधनेन वै ।
स्वर्गोऽयं नेह वैराणि भवन्ति मनुजाधिप ॥ १८
नारदेनैवमुक्तस्तु कुरुराजो युधिष्ठिरः ।
भ्रातॄन्पप्रच्छ मेधावी वाक्यमेतदुवाच ह ॥ १९
यदि दुर्योधनस्यैते वीरलोकाः सनातनाः ।
अधर्मज्ञस्य पापस्य पृथिवीसुहृदद्रुहः ॥ २०
यत्कृते पृथिवी नष्टा सहया सरथद्विपा ।
वयं च मन्युना दग्धा वैरं प्रतिचिकीर्षवः ॥ २१
ये ते वीरा महात्मानो भ्रातरो मे महाव्रताः ।
सत्यप्रतिज्ञा लोकस्य शूरा वै सत्यवादिनः ॥ २२
तेषामिदानीं के लोका द्रष्टुमिच्छामि तानहम् ।
कर्णं चैव महात्मानं कौन्तेयं सत्यसंगरम् ॥ २३
धृष्टद्युम्नं सात्यकिं च धृष्टद्युम्नस्य चात्मजान् ।
ये च शस्त्रैर्वधं प्राप्ताः क्षत्रधर्मेण पार्थिवाः ॥ २४ C. 18. 24 B. 18. 1. 24 K. 18. 1. 24

स एष). K_3 $D_{2-4.7}$ एव ; D_5 G_3 तथा ; G_5 हि तत् ; M_5 तदा (for एष). —^{b}) K_1 स्थानं प्राप्तः सनातनं.

16 ^{a}) K_5 क्षत्रान् ; $D_{5.6}$ $T_{1.2.4}$ G M नैतन् (for न तन्). —^{b}) B_6 युति- ; D_7 यत्तु (for द्यूत-). D_4 G_4 -कारणं ; T_1 -नाशितं ; T_3 -वारितं (for -का°). K_4 यत्पुत्रद्यसकारितं (sic) ; K_6 पुत्र प्रद्युतकारितं. —^{c}) T_2 तु (for च).

17 K_1 D_8 om. (hapl.) 17. —^{a}) D_5 T_1 G_3 च ; D_6 वि- (for ऽपि). D_9 परिक्लिष्टा (for °क्लेशा). —^{b}) K_{2-5} $B_{2.4}$ Dn D_{1-4} T_3 ज्ञाति- ; D_7 याति- (for द्यूत-). T_3 -वारिताः (for -कारिताः). —^{c}) K_2 भव ; K_4 अपि वा (for अथ वा). T_3 om. वा. G_4 अप्यत्र (for अन्यत्र). —^{d}) K_2 तत् ; G_4 त्वं (for तान्).

18 ^{a}) D_5 T_1 G_3 M_5 संगच्छस्व ; D_6 $T_{2.4}$ $G_{1.2.4.5}$ M_{1-4} स्वर्गं गच्छ (for समागच्छ). K_5 T_3 यथा न्याय्यं ; D_9 यथाज्ञायं (sic). —^{b}) K_1 राज्ञे. $D_{5.6}$ S (except T_3) च (for वै). —^{c}) D_9 स्वर्योयं (for स्वर्गोऽयं). $T_{1.2}$ G M नात्र (for नेह). —^{d}) D_6 T_4 वहंति (for भवन्ति).

19 ^{a}) D_8 om. तु. —^{d}) K_{1-3} $D_{5.6.8.9}$ S (except T_3) चेदं (for एतद्). $G_{3.4}$ हा (for ह).

20 ^{c}) K_{3-5} $D_{1.8}$ अधार्मिकस्य पापस्य. —^{d}) K_4 D_1 पृथिव्यां (for °वी-). D_9 reads from सुहृद up to चिकीर्षवः (in 21^{d}) after 22. $K_{1.2}$ T_4 $G_{1.2}$ -सुहृदां द्रुहः ; D_9 -सुहृदद्रुहा ; T_2 -सुसुहृद्द्रुहः.

21 For the sequence in D_9, cf. v. l. 20. —^{b}) T_2 सरथा (for सहया). $K_{4.5}$ B Dn $D_{1-3.7}$ T_3 सनर- ; D_6 G_4 नरथ- ; T_2 सहय- (for सरथ-). D_4 सहया सनराधिपा. —^{c}) K_5 मृत्युना ; $D_{5.6}$ S (except T_3) मन्युभिर् (for °ना). $K_{1.2}$ वयं च मन्युभिर्मं(K_1 °भिर्भ)-ग्ना. —^{d}) K_3 $D_{5.8}$ $T_{1.2}$ $G_{3.5}$ M_{1-3} -जिहीर्षवः (for -चिकीर्षवः).

22 For the sequence in D_9, cf. v. l. 20. K_2 G_5 M_{1-4} om. 22. —^{a}) K_5 $D_{3.5-7}$ T G_{1-4} एते ; B_6 यत्ते ; D_4 मेने (for ये ते). —^{b}) K_5 भ्रातरौ (for °रो). K_1 महाव्रतः ; K_3 $D_{8.9}$ °बलाः ; $K_{4.5}$ D_1 °त्मनः ; D_6 T_4 G_2 यतव्रताः (for महा°). G_4 भ्रातरो यत्र मे व्रताः. — $D_{5.6}$ $T_{1.4}$ G_{1-4} M_5 om. 22^{cd}. —^{c}) T_3 स तु (for सत्य-). D_9 लोकेस्मिन् (for लोकस्य). —^{d}) K_1 श्रोतारः ; D_9 ये शूराः (for शूरा वै).

23 ^{a}) $K_{1.2.4.5}$ T_2 G_5 M_{1-4} ये ($K_{1.2}$ वै) लोका ; D_5 $T_{1.4}$ G_3 लोकान्वै ; D_6 $G_{1.2.4}$ लोका ये (for के लोका). M_5 नैषामिदानीं लोकान्वै. —^{b}) K_2 वीरहान् ; B_3 नारद (for तानहम्). K_4 D_1 द्रष्टुमिच्छामहे वयं ; K_5 °च्छसि तात वै. —^{c}) D_9 महेश्वासं (for महात्मानं). —^{d}) B_6 -संकरं ; D_9 -सागरं (for -संगरम्).

24 D_8 om. 24^{a}. —^{b}) D_8 चात्मजाः ; D_9 सात्मजा (for चात्मजान्). —^{c}) K_1 ममाशु ; K_2 [ऽ]पि चाशु ; K_5 च शब्दैर् ; $D_{4.8}$ च शस्त्र- (for च शस्त्रैर्). K_5 वयं (for वधं). —^{d}) K_5 D_4 क्षात्र- (for क्षत्र-).

25 ^{a}) $K_{1.2.5}$ D_1 क्षत्रिया ; B $T_{1.4}$ $G_{1.5}$ $M_{3.4}$ पार्थिवान् (for °वा). K_3 $D_{8.9}$ सर्वे (for ब्रह्मन्). —^{b}) $K_{1.2}$ $B_{1-4.6}$ Dn_1 D_{2-5} T_3 $M_{1.2}$ एनान् (for एतान्).

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

C. 18. 25
B. 18. 1. 25
K. 18. 1. 24

क नु ते पार्थिवा ब्रह्मन्नैतान्पश्यामि नारद ।
विराटद्रुपदौ चैव धृष्टकेतुमुखांश्च तान् ॥ २५
शिखण्डिनं च पाञ्चाल्यं द्रौपदेयांश्च सर्वशः ।
अभिमन्युं च दुर्धर्षं द्रष्टुमिच्छामि नारद ॥ २६

इति श्रीमहाभारते स्वर्गारोहणपर्वणि प्रथमोऽध्यायः ॥ १ ॥

२

युधिष्ठिर उवाच ।
नेह पश्यामि विबुधा राधेयममितौजसम् ।
भ्रातरौ च महात्मानौ युधामन्यूत्तमौजसौ ॥ १
जुहुवुर्ये शरीराणि रणवह्नौ महारथाः ।
राजानो राजपुत्राश्च ये मदर्थे हता रणे ॥ २
क ते महारथाः सर्वे शार्दूलसमविक्रमाः ।
तैरप्ययं जितो लोकः कच्चित्पुरुषसत्तमैः ॥ ३
यदि लोकानिमान्प्राप्तास्ते च सर्वे महारथाः ।
स्थितं वित्त हि मां देवाः सहितं तैर्महात्मभिः ॥ ४
कच्चिन्न तैरवाप्तोऽयं नृपैर्लोकोऽक्षयः शुभः ।

G_5 M_{1-4} नायकान् (for नारद). — After 25^{ab}, G_4 ins. :

4* ब्रह्मन्नेतान्प्रपश्यामि स्वर्गलोकेऽत्र कर्हिचित् ।

— ^{c}) K_5 -द्रुपदश् (for °दौ). K_{1-3} $D_{5.6.8.9}$ $T_{1.2.4}$ G M_{1-3} विराटं द्रौपदं चैव (K_3 D_8 चापि). — ^{d}) B_6 T_3 G_4 धृष्टद्युम्न- (for धृष्टकेतु-). B_4 M_2 तथा ; D_6 T_4 $G_{1.2.4}$ नृपान् (for च तान्). K_3 $D_{8.9}$ धृष्टकेतुमुखाश्च ये ; D_5 T_1 धृष्टद्युम्नमुखांश्च तान् (T_1 °खांस्तथा).

26 ^{a}) D_8 शिषंडिनं. $B_{2.3.6}$ Dn_1 T_3 तु ; D_9 om. (for च). D_9 M_5 पांचालं. K_1 शिखंढनं च पंचाल्यं (sic).

Colophon. — *Adhy. name :* K_1 स्वर्गे नारदवाक्यं ; K_2 नारदवाक्यं. — *Adhy. no.* (figures, words or both): $K_{2.4.5}$ B_6 Dn_2 $D_{3.7.9}$ S 1 (as in text). — *Śloka no. :* K_4 27 ; K_5 Dn_2 D_9 26.

2

1 ^{a}) $K_{1.4.5}$ D_1 हि ; D_9 ह ; G_5 [ए]नं (for [इ]ह). — ^{b}) M_1 अमितद्युतिं (for °तौजसम्). — ^{c}) D_5 T_1 M_5 महाबाहू (for °त्मानौ). K_2 भ्रातरं च महात्मानं. — ^{d}) K_2 युधामन्यूत्तमौजसं.

2 T_1 om. 2^a–4^b. — ^{a}) G_3 M_6 ते (for ये). — ^{b}) D_6 T_4 G_1 शर- (for रण-). D_5 महारथौ (for °रथाः). — K_2 om. (hapl.) 2^c–3^a. $D_{5.6}$ T_4 G M om. (hapl.) 2^c–4^b. — ^{d}) K_1 मदर्थं (for °र्थे). B_4 महा- (for हता).

3 $D_{5.6}$ $T_{1.4}$ G M om. 3 ; K_2 om. 3^a (for both, cf. v. l. 2). — ^{a}) K_1 एते ; D_8 यूते ; D_9 क्षितौ (for क ते). — ^{b}) D_7 -रथ- (for -सम-). — ^{c}) T_2 तैरप्यह जिता लोकाः. — ^{d}) B_3 Dn_1 -सत्तम (for °मैः). $K_{1.3}$ $D_{8.9}$ कश्चित्पुरुषपुंगवैः.

4 $D_{5.6}$ $T_{1.4}$ G M om. 4^{ab} (cf. v. l. 2). — ^{b}) T_2 न (for ते). K_{1-3} [ऽ]पि (for च). — ^{c}) D_8 T_3 स्थिते (for स्थितं). G_3 स्वर्गेह (for वित्त हि). K_{1-4} $B_{1-4.6}$ $D_{1.5.7.9}$ $T_{1.3}$ G_4 M_5 [इ]ह (for हि). D_6 $T_{2.4}$ $G_{1.2}$ हि तैर् ; M_2 च मा ; M_5 [इ]ह मा (for हि मां). K_5 स्थिते चित्ते ह मे देवाः ; G_5 $M_{1.3.4}$ स्थितं वित्ते महादे(M_4 हता दे)वाः. — ^{d}) G_1 स हि देवैर् ; G_2 स हतस्तैर् (for सहितं तैर्). $D_{5.9}$ वै (for तैर्). K_3 महारथैः (for °त्मभिः).

5 ^{a}) $K_{1.2}$ D_8 कश्चिन्नु ; K_3 कच्चित्तु ; K_5 क्वचिन्न ; B_4 कच्चिन्नु (for °न्न). K_5 D_6 नैतैर् ; G_3 नृपैर् (for न तैर्). D_5 कच्चिन्नवैरवाप्तो यैर्. — ^{b}) T_1 स्वर्ग- (for नृपैर्). K_5 $G_{2.5}$ लोकक्षयः (for लोकोऽक्षयः). K_5 G_4 शुभाः ; B_4 स्मृतः ; D_9 शुभं (for शुभः). D_8 नृभिर्लोका क्षपः शुभः (sic) ; G_3 स्वर्लोको ह्यक्षयः शुभः. — ^{c}) D_9 तैरिह ; T_1 ते वहं (for तैरहं). $B_{1.3.5.6}$ Dn $D_{1-4.7}$ T_3 रंस्ये ; D_5 दष्ट्ये (sic) (for वत्स्ये). K_1 न तैर्विनाप्यहं वत्स्ये. — ^{d}) D_6 $T_{2.4}$ $G_{1.2.4}$ M_1 बंधुभिर्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न तैरहं विना वत्स्ये ज्ञातिभिर्भ्रातृभिस्तथा ॥ ५
मातुर्हि वचनं श्रुत्वा तदा सलिलकर्मणि ।
कर्णस्य क्रियतां तोयमिति तप्यामि तेन वै ॥ ६
इदं च परितप्यामि पुनः पुनरहं सुराः ।
यन्मातुः सदृशौ पादौ तस्याहममितौजसः ॥ ७
दृष्ट्वैव तं नानुगतः कर्णं परबलार्दनम् ।
न ह्यस्मान्कर्णसहिताञ्जयेच्छक्रोऽपि संयुगे ॥ ८
तमहं यत्रतत्रस्थं द्रष्टुमिच्छामि सूर्यजम् ।
अविज्ञातो मया योऽसौ घातितः सव्यसाचिना ॥ ९
भीमं च भीमविक्रान्तं प्राणेभ्योऽपि प्रियं मम ।
अर्जुनं चेन्द्रसंकाशं यमौ तौ च यमोपमौ ॥ १०
द्रष्टुमिच्छामि तां चाहं पाञ्चालीं धर्मचारिणीम् ।
न चेह स्थातुमिच्छामि सत्यमेतद्ब्रवीमि वः ॥ ११
किं मे भ्रातृविहीनस्य स्वर्गेण सुरसत्तमाः ।
यत्र ते स मम स्वर्गो नायं स्वर्गो मतो मम ॥ १२

देवा ऊचुः ।

यदि वै तत्र ते श्रद्धा गम्यतां पुत्र माचिरम् ।
प्रिये हि तव वर्तामो देवराजस्य शासनात् ॥ १३

वैशंपायन उवाच ।

इत्युक्त्वा तं ततो देवा देवदूतमुपादिशन् ।   C. 18. 40 B. 18. 2. 14 K. 18. 2. 14

(for ज्ञातिभिर्). $B_{5.6}$ Dn $D_{2-4.7}$ T_3 भ्रातृभिर्ज्ञातिभिस्तथा (T_3 °भिः सह).

6 ^{a}) $D_{5.6}$ $T_{2.4}$ G M मे (for हि). T_1 एव वचः (for हि वचनं). $B_{1.5}$ स्मृत्वा (for श्रुत्वा). — ^{b}) D_7 तथा; D_9 यदा (for तदा). K_1 -कर्मणा (for °णि). — ^{c}) K_1 कर्णाय दीयतां तोयम्. — ^{d}) $K_{1.2}$ तस्यापि; D_5 वेत्स्याम; D_6 T_1 $G_{3.4}$ M_5 तप्स्यामि; D_7 तप्यानि (for °मि).

7 ^{a}) G_4 प्रति- (for परि-). $D_{5.6}$ $T_{1.2}$ $G_{3.4}$ -तप्स्यामि (for -तप्यामि). — ^{b}) K_2 पुरा (for सुराः). — ^{c}) $K_{1.2}$ D_9 यन्मातृ-; G_4 यस्मात्तु (for यन्मातुः). — ^{d}) $K_{1.2}$ दृष्ट्वा तस्य (for तस्याहम्). K_{1-3} B Dn $D_{2-4.8.9}$ $T_{2.3}$ अमितात्मनः (for °तौजसः). $K_{4.5}$ D_1 कर्णस्य प्रथि(K_5 °मि)तौजसः; D_7 न पश्यामि महात्मनः.

8 ^{a}) K_4 दृष्ट्वा च; K_5 दृष्टौ च (for दृष्ट्वैव). K_{3-5} $B_{1-3.6}$ Dn $D_{1.2.4.7}$ T_3 तौ; D_9 ते (for तं). D_6 G_2 न तु (for नानु-). M_3 -गतं (for -गतः). M_5 दृष्ट्वैव तस्यानुगतः. — ^{d}) D_9 जयेयुः केपि संयुगे; G_4 यज्ञेच्छक्रोविसंयुगे (sic).

9 $K_{1.2}$ om. 9^{ab}. — ^{a}) D_5 -कुत्रस्थं (for -तत्रस्थं). — ^{b}) K_4 (marg. as in text). $_5$ D_1 दुर्जयं (for सूर्यजम्). — ^{c}) K_{1-3} $D_{5.6.9}$ S (except T_3) अविज्ञानान्; K_5 अभिजातो (for अविज्ञातो). K_3 सो (for यो). T_1 वै (for ऽसौ). D_8 अविज्ञातव्यं तयाप्तोसौ (sic). — ^{d}) K_3 $D_{6.8}$ T_4 $G_{1.2}$ M_1 पातितः (for घा°).

10 ^{a}) D_5 भीमस- (for च भीम-). K_3 $D_{8.9}$ -कर्माणं (for -विक्रान्तं). — ^{c}) $K_{3.5}$ D_5 चंद्र-; D_8 प्राण- (for चेन्द्र-). — ^{d}) K_1 $B_{1-3.5.6}$ Dn $D_{2-4.7}$ T_3 चैव; D_6 च*; $T_{2.4}$ $G_{1.2}$ चापि; G_4 च सु- (for तौ च). K_{1-3} $D_{5.6.8.9}$ S (except T_3) महाबलौ (for यमोपमौ).

11 ^{a}) K_3 D_8 देवाः; K_4 चाह; T_2 M_2 चापि (for चाहं). $K_{1.2}$ अनुगच्छामि तां चाहं. — ^{c}) B_4 नन्विह; D_6 न चेत्तु (for न चेह). D_8 न रोहस्थानमिच्छामि. — ^{d}) K_4 $B_{1.5.6}$ Dn $D_{2.3.7}$ T_3 G_3 एवं; B_2 D_4 G_4 एव (for एतद्). B_3 ते; G_4 नः (for वः).

12 ^{b}) D_5 T_1 G_3 स्वर्गोपि (for स्वर्गेण). K_1 पर-; K_5 स्वर- (for सुर-). D_9 -सत्तम (for °माः). — ^{c}) $K_{2.4.5}$ B Dn $D_{1-3.7}$ T_3 मम स (by transp.); D_4 [ऽ]द्य मम; $D_{5.6}$ G_4 हि मम; D_9 G_3 स्व मम; $T_{1.4}$ $G_{1.2}$ हि (T_1 स्व) मतः; T_2 संमतः. K_1 सर्गो (for स्वर्गो). — ^{d}) K_1 नरकोपि; K_2 तत्र वासो; K_4 (marg. as in text) यतः स्वर्गो; D_8 om. (for नायं स्वर्गो). D_5 मतं (for मतो). — After 12, $K_{1.2}$ ins.:

5* तथेत्यूचुर्वचस्तस्य देवाः सर्षिगणास्ततः ।
[K_2 तथा (for ततः).]

13 T_1 om. 13. — ^{a}) K_{1-3} $D_{6.8.9}$ T_4 G M तत्र (K_3 $D_{8.9}$ गंतुं; G_4 यत्र) तव; D_5 तत्र तप-; T_2 तत्र ततः (for वै तत्र ते). — ^{b}) $K_{2.5}$ om.; $K_{3.4}$ B_3 $D_{1.5.6.8.9}$ $T_{2.4}$ G M तत्र (for पुत्र). — ^{c}) B_4 हि ते च; D_5 G_3 M_5 तव हि (by transp.).

14 ^{a}) $K_{1.2}$ $D_{5.6}$ $T_{2.4}$ G M ते (G_4 वै) ततो; K_3 D_8 ते तदा; $K_{4.5}$ $B_{2.3}$ D_1 तु ततो; D_4 तं तदा (for

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

C. 18 40 B 18 2.14 K. 18. 2. 14

युधिष्ठिरस्य सुहृदो दर्शयेति परंतप ॥ १४
ततः कुन्तीसुतो राजा देवदूतश्च जग्मतुः ।
सहितौ राजशार्दूल यत्र ते पुरुषर्षभाः ॥ १५
अग्रतो देवदूतस्तु ययौ राजा च पृष्ठतः ।
पन्थानमशुभं दुर्गं सेवितं पापकर्मभिः ॥ १६
तमसा संवृतं घोरं केशशैवलशाद्वलम् ।
युक्तं पापकृतां गन्धैर्मांसशोणितकर्दमम् ॥ १७
दंशोत्थानं सझिल्लीकं मक्षिकामशकावृतम् ।
इतश्चेतश्च कुणपैः समंतात्परिवारितम् ॥ १८
अस्थिकेशसमाकीर्णं कृमिकीटसमाकुलम् ।
ज्वलनेन प्रदीप्तेन समन्तात्परिवेष्टितम् ॥ १९
अयोमुखैश्च काकोलैर्गृध्रैश्च समभिद्रुतम् ।
सूचीमुखैस्तथा प्रेतैर्विन्ध्यशैलोपमैर्वृतम् ॥ २०
मेदोरुधिरयुक्तैश्च छिन्नबाहूरुपाणिभिः ।
निकृत्तोदरपादैश्च तत्र तत्र प्रवेरितैः ॥ २१
स तत्कुणपदुर्गन्धमशिवं रोमहर्षणम् ।

तं ततो). K2 दूता (for देवा). D9 T1 इत्युक्तास्ते ततो देवा. — b) K1 D5.6 T1.2.4 G M अथाब्रुवन् (D6 °ब्रवीत्); K3 D3.9 समादिशन्; K5 अथादिशत्; B3.6 उपाविशन् (for °दिशन्). K4 दूतं चैवमथादिशन्. — c) K4.5 D1 सहितान् (for सुहृदो). — d) K3 D8 त्वं (for [इ]ति).

15 b) B3 तु (for च). — d) D7 ये (for ते).

16 a) K1–3.5 B3.4 D8.9 M4.5 च (for तु). — c) M3 अशिवं (for अशुभं). K2 स्वर्गं (for दुर्गं). — d) B6 सेवितुं (for °तं). K3 -कर्दमैः (for -कर्मभिः).

17 K3 om. (hapl.) 17. — a) B1.6 संप्लुतं (for संवृतं). D8 लोकं (for घोरं). — K4 reads 17^{b}–18^{b} on marg. — b) K1 -शेवाल-; K2 -सेवल-; G1.2.4 -शैवाल- (for -शैवल-). K4 D (except Dn2) T2.4 G M -शाड्वलं; T1 -शाड्वलः (for -शाद्वलम्). — D6 om. 17^{c}–19^{b}. — c) K1.2 D1.5 T4 G1–3.5 M1.2 पृक्तं; K5 पृक्त-; B6 युक्त-; D8.9 क्लिसं; G4 M4.5 वृतं (for युक्तं). T1 पृक्तं शोणितवर्षेण. — d) D8 G4 -कर्दमैः (for °मम्). T1 मांसमेदोस्थिसंकुलं.

18 D6 om. 18 (cf. v. l. 17). K4 reads 18^{ab} on marg. — a) D5 T4 दंशोद्वानं (for °त्थानं). T2.3 सझलि(T3 °ल्ली)कं (for सझिल्लीकं). K1 देशोत्पातकवल्लूकं; K2.4.5 Dn D2–4.7 दं(K4 द)शोत्पातकभ(K2 °ब)ल्लूक-; K3 D8 दंशमत्कुणयूकाभिर्; B1.2 (marg.).3.4.6 D1.9 दंशोत्पातकचिल्लूक- (B2 [orig.] °झिल्लीक-); G3.4 वंशोत्था(G4 दंशोथ्वा)नं सझल्लीकं. — b) K4 -मक्षीका-. B3 -मसकावृतं; T1 G3 M5 -मशकाततं; T2 G1.2.4.5 M2–4 °न्वितं; M1 °चितं (for °वृतम्). K1 मक्षीकसरघावृतं; K3 मशकामक्षिकावृतं; D9 -मक्षकामसकावृतं. — c) G2 इदं (for इतश्). K5 कशायैः (sic) (for कुणपैः).

19 D6 om. 19^{ab} (cf. v. l. 17). K1.2 D4 om. 19. — a) B3 -समायुक्तं (for °कीर्णं). — b) T1.2 G2 M1.2 क्रिमि- (for कृमि-). T3 -माटि- (for -कीट-). K5 B4 (marg. as in text) -समावृतं (for °कुलम्). K3 D8.9 कृमिकीटकसंकुलं. — c) G3 ज्वलदर्क- (for ज्वलनेन). — d) K3 B1.5 Dn2 D3.5.6.8.9 T1.2.4 G M -वारितं; K5 -चेष्टितं (for -वेष्टितम्).

20 a) G1 अधो-; G2 अथो (for अयो-). K4 काकाघैर्; K5 Dn D2–4 T3 काकाद्यैर्; B2.4 D1 काकौघैर्; G3 काकोवैर्; M4 काकालैर् (for काकोलैर्). — b) K1 ग्रद्धैश्; D8 गृध्रश्; D9 ग्रध्रैश् (for गृध्रैश्). K2 om. च. K4 (*sup. lin.* as in text) समभिस्तुतं; B4 °धिद्रुतं (for °भिद्रुतम्). D5.6 T1.4 G1.2.4.5 M गृध्रैश्चैव समन्वितं; T2 समंतात्परिधावितं; G3 गृध्रश्चैव संमततः. — K4 D5.6 S (except T3) om. (hapl.) 20^{cd}. — c) Dn -मूखैस्. Dn2 T3 प्रीतैर् (sic) (for प्रेतैर्). — d) K1 वृद्धैः; K2 वृद्ध-; B4 विल्व- (for विन्ध्य-). D1 reads from पमैर्वृतं up to शिवं रो (in 22^{b}) on marg. K3 विंध्यशैलसमावृतं; D8 विंध्यशैलसमैर्वृतं; D9 वंध्याशैलसमैर्वृतं.

21 D1 reads 21 on marg. — a) K1 B2 (marg. as in text) D5.6 T4 G1–3.5 M1.2.4 -पृक्तैश्च; K3 D8.9 -संपृ(D8 °वृ)क्तैश्; K5 T2 -संपृक्तं; D1 -पृक्तं तु; T1 G4 -सिक्तैश्च; M5 -वृत्तैश्च (for -युक्तैश्च). K4 मेधोरुधिरयुक्तं तु. — b) K4 छिन्नैर् (for छिन्न-). T1 G1 M4 -जानुभिः (for -पाणिभिः). D5.6 T4 G2–4 M1–3 भिन्नबाहूरुजानुभिः; T2 G5 M5 भिन्नजानूरुबाहुभिः. — c) K1 निर्वृत्तोदर-; K2 निवृतो°; K3 D8.9 विकृतो°; B6 निकृत्ते दैव- (for निकृत्तोदर-). D9 तु (for च). K4.5 D1 भिन्नोदरैस्तथा पादैस्. — d) K3 D8.9 T2 G1.2 M2 (*inf. lin.*).3 प्रवेशितैः; K4 D1 प्रचारितैः; K5 प्रचोदितैः; B5 प्रवेपितैः; D5 T1.3 G3.4 प्रयोजितैः; D6 प्रतेजितैः; G5 M1.2.4.5 प्रवेजितैः (for °रितैः). K2 तत्र

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जगाम राजा धर्मात्मा मध्ये बहु विचिन्तयन् ॥ २२
ददर्शोष्णोदकैः पूर्णां नदीं चापि सुदुर्गमाम् ।
असिपत्रवनं चैव निशितक्षुरसंवृतम् ॥ २३
करम्भवालुकास्तप्ता आयसीश्च शिलाः पृथक् ।
लोहकुम्भीश्च तैलस्य क्वाथ्यमानाः समन्ततः ॥ २४
कूटशाल्मलिकं चापि दुस्पर्शं तीक्ष्णकण्टकम् ।
ददर्श चापि कौन्तेयो यातनाः पापकर्मिणाम् ॥ २५
स तं दुर्गन्धमालक्ष्य देवदूतमुवाच ह ।
कियदध्वानमस्माभिर्गन्तव्यमिदमीदृशम् ॥ २६
क्व च ते भ्रातरो मह्यं तन्ममाख्यातुमर्हसि ।
देशोऽयं कश्च देवानामेतदिच्छामि वेदितुम् ॥ २७
स संनिववृते श्रुत्वा धर्मराजस्य भाषितम् । C. 18. 54 B. 18. 2. 28 K. 18. 2. 28

तत्राप्रवीरितैः.

22 D_1 reads up to शिवं रो on marg. —^{a}) K_1 $D_{5.6.8.9}$ $T_{2.4}$ $G_{1.2.4.5}$ M स तं; T_1 शितं (for स तत्). G_3 -दुर्गंधैर्. —^{b}) K_3 D_9 अशुभं; K_5 आशिवं (for अ°). N (except $D_{5.6}$) लोम- (for रोम-). K_1 -हर्षिणं. —^{d}) K_1 B_3 $D_{5.6}$ $T_{2.4}$ $G_{2.4.5}$ M मध्येन बहु-; T_1 $G_{1.3}$ मध्ये स (G_3 तं) बहु- (for मध्ये बहु वि-). $K_{2.3}$ $D_{8.9}$ मध्येन बहु चिंतयन्.

23 D_7 om. 23^a–24^b. —^{a}) $K_{1.3}$ $D_{8.9}$ उष्णोदका (K_3 °कां); M_{2-4} वैतरणीं (for उष्णोदकैः). Dn_2 D_9 कीर्णां (for पूर्णां). B_1 स ददर्शोदकैः पूर्णां; D_5 $T_{1.4}$ G_3 M_5 पश्यन्वैतरणीं पूर्णां; G_5 दृष्टो वैतरणीं पूर्णां (sic). —^{b}) K_3 D_3 राजा; K_5 वापि; D_5 $T_{1.4}$ $G_{3.5}$ M_{2-5} चैव (for चापि). —For 23^{ab}, D_6 T_2 $G_{1.2.4}$ M_1 subst.:

6* सुदुर्गमां वैतरणीं पूयपूर्णां ददर्श सः ।

[T_2 पाप-; G_4 *य-; M_1 पापैः (for पूय-).]

—^{d}) $K_{3.4}$ $D_{1.6}$ $T_{2.4}$ $G_{4.5}$ $M_{2.4.5}$ निशितं (for निशित-).

24 D_7 om. 24^{ab} (cf. v. l. 23). B_5 om. 24–26. —^{a}) G_4 करंब- (for करम्भ-). K_2 Dn D_4 -वालुका; K_3 -वालुकां; T_3 -वालकास् (for -वालुकास्). B_1 तप्ताम्; D_3 damaged; D_6 तत्र (for तप्ता). K_1 करंभुवालकांस्तप्ता (sic); K_4 करंभवालुकां तमदा (sic); K_5 करंभवालक्यतमाम्; $B_{2-4.6}$ $D_{1.5.8.9}$ T_1 G_3 $M_{1.3-5}$ करंभवालुकां त(B_6 $D_{5.8}$ T_1 °कात)प्तां; G_5 M_2 कदंबवालुकां तप्तां. —^{b}) K_2 आयशीश्; $T_{2.4}$ $G_{1.2}$ M_1 पृथुलाश्; T_3 आयसाश् (for आयसीश्). $D_{5.6}$ T_1 $G_{3.5}$ M_{2-5} पृथुलां च (D_6 °लाश्च) शिलां ($M_{2.3}$ °वां) पृथक्; $D_{8.9}$ आयसी (D_9 °सीं) च शिला (D_9 °लां) पृ°; G_4 प्राथिताश्च शिराः पृथक्. —^{c}) B_3 D_7 T_3 -कुंभाश्; D_5 -कुंभिं; T_1 -कुंभीं; G_3 -कुंभं (for -कुम्भीश्). K_4 D_1 तु (for च). D_4 तैलं च (for तैलस्य). K_5 लोहकुंभ्यस्तैशलस्य (sic); G_4 °कुंभस्तीक्ष्णसूच्या (sic). —^{d}) K_5 क्वाथ्यमानः; B_3 °मानान्; D_5 $M_{4.5}$ क्वाथ्य(M_4 क्वथ)मानां; D_6 कायामानाः; T_1 क्वाथ्यमाणं; $T_{2.4}$ $G_{1.2.5}$ M_{1-3} क्वथमानाः; G_3 स्वाद्यमानां; G_4 बाध्यमानाः (for क्वाथ्यमानाः). K_1 पुनः पुनः (for समन्ततः).

25 B_5 om. 25 (cf. v. l. 24). —^{a}) $K_{1.2}$ -शा- (K_1 -श)ल्मलिनं (for °कं). B_4 चैव (for चापि). K_3 D_3 कूटशाल्मलिनं तत्र; K_4 कृच्छ्रं शाल्मलिकं वाट-; $D_{5.9}$ T_1 G_3 कूटशाल्मलिनीं (D_9 °नं) चैव; D_6 कृतशल्मलिनश्चैव; $T_{2.4}$ $G_{1.5}$ M कूटशल्मलिनं चैव; G_2 °शाल्मलिनश्चैव; G_4 °नं धीरं. —^{b}) K_5 दुस्पर्शैस्; B_4 दुस्पर्णं (for °र्शं). $K_{1.2}$ भृशती(K_2 °र्शं ती)क्ष्णं च (K_2 स-) कंटकं; D_5 G_3 दुस्पर्शांस्ती(D_5 °र्शां ती)क्ष्णकंटकान्; T_1 दुस्तरां तीक्ष्णकंटकां. —^{c}) K_3 D_3 राजा; D_6 T_2 चान्याः; T_4 $G_{1.2}$ [अ]न्याश्च; G_4 चान्यत्; M_1 च* (for चापि). —^{d}) T_1 यातनां (for °नाः). K_3 $B_{1.3.4.6}$ $D_{4.5.7.9}$ $T_{1.4}$ $G_{1.2.4}$ $M_{1.5}$ -कर्मणां; K_5 -कर्मणा (for -कर्मिणाम्).

26 B_5 om. 26 (cf. v. l. 24). —^{a}) K_1 आलिख्य; K_3 D_3 आलोक्य (for आलक्ष्य). $K_{4.5}$ D_1 स दुर्गं* निरीक्ष्याथ. —^{b}) K_{1-3} $D_{8.9}$ $T_{1.2}$ $G_{1-3.5}$ M पुरुषं तम् (for देवदूतम्). —^{c}) D_9 कियद्धामामसुराभिर् (sic); T_1 G_5 कियानध्वा स चास्माभिर्. —^{d}) D_9 यंतव्यम् (for गं°). Dn D_{2-4} T_3 इमम् (for इदम्).

27 ^{a}) K_5 क्वचितं (for क्व च ते). —^{b}) K_5 तत्त्वेन; D_3 तन्मया (for तन्मम). D_9 तन्मनाक्ष्यातुमर्हसि (sic). —^{c}) B_6 देषो; G_3 देवो (for देशो). D_9 कस्य (for कश्च). T_1 देवानामेव देशोयम्; G_4 देशोयं कश्चिदेदेवम् (sic).

28 ^{a}) K_5 समं (for स सं-). K_1 $D_{5.6}$ $T_{1.4}$ G_{1-4} $M_{1.2}$ तन्; K_2 D_9 T_2 तं (for सं-). D_4 स संनिवृत्य श्रुत्वा तु. —^{b}) K_3 B_6 भाषितुं. —^{c}) D_5 T_1 G_3 वाक्यम्; $G_{1.2.4}$ चैवम् (for चैनम्). —^{d}) K_3 $D_{3.9}$ प्रति; D_4 मम (for तव). — After 28, G_3 reads

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

C. 18. 54
B. 18. 2. 28
K. 18. 2. 28

देवदूतोऽब्रवीच्चैनमेतावद्गमनं तव ॥ २८
निवर्तितव्यं हि मया तथास्म्युक्तो दिवौकसैः ।
यदि श्रान्तोऽसि राजेन्द्र त्वमथागन्तुमर्हसि ॥ २९
युधिष्ठिरस्तु निर्विण्णस्तेन गन्धेन मूर्छितः ।
निवर्तने धृतमनाः पर्यावर्तत भारत ॥ ३०
स संनिवृत्तो धर्मात्मा दुःखशोकसमन्वितः ।
शुश्राव तत्र वदतां दीना वाचः समन्ततः ॥ ३१
भो भो धर्मज राजर्षे पुण्याभिजन पाण्डव ।
अनुग्रहार्थमस्माकं तिष्ठ तावन्मुहूर्तकम् ॥ ३२
आयाति त्वयि दुर्धर्षे वाति पुण्यः समीरणः ।
तव गन्धानुगस्तात येनास्मान्सुखमागमत् ॥ ३३
ते वयं पार्थ दीर्घस्य कालस्य पुरुषर्षभ ।
सुखमासादयिष्यामस्त्वां दृष्ट्वा राजसत्तम ॥ ३४
संतिष्ठस्व महाबाहो मुहूर्तमपि भारत ।
त्वयि तिष्ठति कौरव्य यातनास्मान्न बाधते ॥ ३५
एवं बहुविधा वाचः कृपणा वेदनावताम् ।

33^{cd} for the first time, repeating it in its proper place.

29 D5. 6 T1. 4 G M om. 29. — ^{a}) K3 B5 Dn D1–4 T2. 3 निवर्तितव्यो (for °तव्यं). K1. 2 च; B2 om.; D8 स (for हि). K4 निवेदितव्यं हि मया. — ^{b}) K3 यस्यास्म्युक्तो; K4 यथास्म्युक्तो; B3 यथास्युक्तो; B6 T3 तथास्युक्तो; T2 तथा चोक्तो (for तथास्म्युक्तो). K1. 2 यथास्म्युक्तो दिवालयैः; K5 यथास्त्यक्तो दिवौकसः; D8 यस्याम्युक्तौ दिवालयैः; D9 यास्यास्युक्तो दिवालये (sic). — ^{d}) K1–3 B2–4 D7. 9 अपि (for अथ).

30 Before 30, D5 T1. 2 G3 M2 ins. वैशंपायनः. — ^{a}) K1 निर्वाणं (for निर्विण्णस्). — ^{b}) K4 तस्य (for तेन). B4 (marg. as in text) निर्वृतः (for मूर्छितः). — ^{d}) K1–3 D5. 6. 8. 9 T1. 4 G M पर्यवर्तत; K5 D1 पर्यतप्यत.

31 ^{a}) K5 समं; G3. 4 M2 स तन्; G5 स तं (for स सं-). D8 -विवृत्तो (for -निवृत्तो). M5 संनिवृत्तोथ धर्मात्मा. — ^{b}) K1 B1. 5. 6 Dn D2–4. 7 T3 M2 -समाहृतः (for -समन्वितः). — ^{c}) B2 रुदतां; B4 न° (for व°). K3 D8 शुश्राव वदतां तत्र. — ^{d}) Dn1 दीनां (for दीना).

32 ^{a}) K1. 2 T1–3 G M1–3. 5 धर्मज्ञ; K4 वै धर्म (for धर्मज). K3 B3 D8. 9 भो धर्मराज राजर्षे; K5 भो भो वै धर्मराजर्षे. — ^{b}) D5 T1 G3 धर्माभिजन (for पुण्या°). — ^{d}) K5 तिष्ठ तात सुमुहूर्तकं (hypermetric).

33 ^{a}) K4 आयाते (for °ति). K2 M1 दुर्धर्ष. K1 corrupt; K3 D5. 6. 8 T1. 2. 4 G1. 2. 4. 5 M2–5 आयातस्त- (K3 D8 °याति त-; T4 °यतस्त)व दुर्धर्ष; B4 आयाते त्वयि दुर्धर्ष; G3 दायादस्तव राजर्षे. — ^{b}) K5 Dn2 T3 G2 पुण्य- (for पुण्यः). K3 सुशीतळः (for समीरणः). K1 वायुः पुण्यसमीरणः; D8 वायुः पुण्यः सुशीतलः. — G3 reads 33^{cd}, for the first time, after 28. — ^{c}) K4 गंधानुगा (for °नुगस्). G3 (second time) तदधस्तावको ह्यस्मान्. — ^{d}) D8 सुषम्. K1 आनतान्; K2. 3 D8. 9 G1 आगतं (for आगमत्). D5. 6 T2. 4 G2. 3 (first time). 4. 5 M तेनास्मान्सुखमागतं; G3 (second time) आत्मानं सुखमागतं. — For 34^{cd}, T1 subst.:

7* पवनस्तात तेनास्मांस्तस्मान्सुखयति प्रभो ।

34 D5. 6 T1. 4 G M om. 34^{ab}. — ^{b}) K5 D1. 4 भरतर्षभ (for पुरुषर्षभ). — ^{c}) K1 आसादियिष्यामस (sic); K3 आस्वादयिष्यामस; K4 आराध°; D9 आसादियिस्यामस (sic). — ^{d}) K1. 2 त्वद्दृष्ट्वा (for त्वां दृष्ट्वा). D8 त्वा दृष्ट्वा राजसत्तमः.

35 ^{a}) K2 संतिष्ठति; B3 सातिश्च सु- (sic); B5 D8 स तिष्ठस्व; Dn2 T4 G1. 4 संतिष्ठ त्वं (for °ष्ठस्व). — ^{b}) D5 T1 G3 M5 मुहूर्ताद् (for °र्तम्). K2. 4. 5 B4 D1 T1. 2 G1. 3. 5 M इव; B2 D8 T4 G2. 4 इह (for अपि). — ^{c}) T3 त्वय्यतिष्ठति (sic). G5 M2 कौंतेय (for कौरव्य). — ^{d}) T3 बाध्यते (for बाधते). K1 यातनास्मान्निबाधिते (sic).

36 ^{a}) D5 T1 G3 एता (for एवं). B3 om. बहु-. — ^{b}) G2 कृपणं (for °णा). K1. 2 कृपणानां च भारत; K4. 5 D1 कृपणाश्चैव भारत; T3 कृपणा वेदना तदा; G4 °णा वदतां वर. — ^{c}) G4 तस्माद् (for तस्मिन्). D9 देशेषु; G3 देशे च (for देशे स). K1 स आश्राव; K4 समुच्छ्वास (for स सुश्राव). — ^{d}) K3. 4 D9 वरः; D1 नृपः; D8 वर; G4 कृपां (for नृप). M3 वदतां नृपते तदा.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तस्मिन्देशे स शुश्राव समन्ताद्वदतां नृप ॥ ३६
तेषां तद्वचनं श्रुत्वा दयावान्दीनभाषिणाम् ।
अहो कृच्छ्रमिति प्राह तस्थौ स च युधिष्ठिरः ॥ ३७
स ता गिरः पुरस्ताद्वै श्रुतपूर्वाः पुनः पुनः ।
ग्लानानां दुःखितानां च नाभ्यजानत पाण्डवः ॥ ३८
अबुध्यमानस्ता वाचो धर्मपुत्रो युधिष्ठिरः ।
उवाच के भवन्तो वै किमर्थमिह तिष्ठथ ॥ ३९
इत्युक्तास्ते ततः सर्वे समन्तादवभाषिरे ।
कर्णोऽहं भीमसेनोऽहमर्जुनोऽहमिति प्रभो ॥ ४०
नकुलः सहदेवोऽहं धृष्टद्युम्नोऽहमित्युत ।
द्रौपदी द्रौपदेयाश्च इत्येवं ते विचुक्रुशुः ॥ ४१
ता वाचः स तदा श्रुत्वा तद्देशसदृशीर्नृप ।
ततो विमम्रृशे राजा किं न्विदं दैवकारितम् ॥ ४२
किं नु तत्कलुषं कर्म कृतमेभिर्महात्मभिः ।
कर्णेन द्रौपदेयैर्वा पाञ्चाल्या वा सुमध्यया ॥ ४३
य इमे पापगन्धेऽस्मिन्देशे सन्ति सुदारुणे । C. 18. 70 B. 18. 2. 44 K. 18. 2. 44

37 a) B1–3.5.6 Dn D1–4.6.7 T3 G4 तु (for तद्). — b) D3 दीर्घ- (for दीन-). B6 D5 T1.2.4 G1–3.5 M -भाषितं (B5 °तां); D6 °तः (for -भाषिणाम्). — After 37^{ab}, K3 D8 ins.:

8* उवाच वदतां श्रेष्ठो धर्मपुत्रो युधिष्ठिरः ।

— Before 37^{cd}, K3 D8 ins. युधिष्ठिर उवाच. — c) K4 (marg. as in text) 5 B3.6 D1 अति- (for अहो). — d) K3 D8 तत्र तस्थौ; K4 5 D1 तस्थौ तत्र; B1–4.6 D5.7.9 T2.4 G1–3 M5 तस्थौ च स (M5 सु-); D6 G4 स तस्थौ च; T3 तस्थाव स (sic); M3 स च तस्थौ (for तस्थौ स च).

38 T1 om. 38. — a) K1.2 एता; G4 स तां (for स ता). K5 स तेषां गिरसस्तां वै (sic). — b) D9 श्रुतपूर्वा; G3 श्रुतिपूर्णाः (for श्रुतपूर्वाः). — c) K3 क्रांतानां; K5 D1 म्लानानां; T4 G1.2 जनानां; G3 ग्लानीनां; G4 आर्तानां (for ग्लानानां). K4 ग्लानानां चेद्दुःखितानां; D3 क्रोशानां दुषितानां च (sic). — d) D5 G3 M5 न (G3 स) ब्यजानत; G5 M2–4 नाभ्यजानीत (for °जानत). D9 पांडव. K5 नाभिजानीच्च पांडव; D8 नान्वजानत पांडवान्.

39 a) D8 om. वाचो. G4 अबुध्य मनसा वाचो. — b) K1–3 D5.6.8 T1.2.4 G M1–3 धर्मराजो (for °पुत्रो). — c) G3 च (for के). D5 हि (for वै). K5 उवाच ते ब्रुवंतो मां. — d) K2.5 B Dn D5.6 T2–4 G M चेह; K4 त्वेह; D9 चापि (for इह). K3 D2–6.8 T3 G4 तिष्ठत; D9 G3 तिष्ठतः (for °थ).

40 b) K1 च बभाषिरे; B6 D1.5 T1 G3–5 आब°; D4 अथ भा°; D6 T4 G1.2 अभि°; D9 आवि° (for अव°). — D6 om. (hapl.) 40^{d}–41^{a}.

41 D3 om. 41^{a} (cf. v. l. 40). — a) Dn च (for ऽहं). — d) B2 एवातं (for एवं ते). K3 D5 T2 G2 तत्र; K5 D1 तेपि; D8 ते च (for ते वि-). K2 D6 T1.4 G4.5 M1.2.4.5 [इ]त्येवं (M2 °व) ते तत्र चुक्रुशुः; G1 एवं ते तत्र चु°; G3 सेवंते तत्र चु°.

42 a) T3 ते वाचस्तदा श्रुत्वा (submetric); G4 स ता वाचस्तथा श्रुत्वा. — b) D6 T4 तथैव; M3 तद्देव- (for तद्देश-). D5 -सदृशैर्; D9 -सदृशी; T3 °श-; G3 °शा (for °शीर्). D8 M2.4 नृपः (for नृप). K2 तद्देशसदृशो नृपः; K3 स देशसदृशीर्नृप; K5 D1 संदेशसदृशा नृपः; T1 तद्देशे धर्मनंदन; T2 G4 M1 तथैव सदृशीर्नृपः (G4 °प); G1.2 तथैव सदृशं नृ(G1 °शी नृ)प. — c) D5.6.9 T1.2.4 G1–4 M1.5 रोषाद्; G5 M2.4 दोषान् (for ततो). K1.4.5 B Dn D1–4 T1.4 M5 विमम्रृषे (B3 T4 °धे) (for °म्रृशे). D9 राजन् (for राजा). K3 D8 रोषात्स मम्रृषे (D8 °शे) धीमान्. — d) K1 B4 किमिदं; K2–5 Dn D1–4.6–9 T3 G1.2.5 M4.5 किं त्विदं (for किं न्विदं). K2 चैव; D6 T G1.2 M2 देव- (for दैव-). B6 किं न्विदं दैवभाषितं; G4 मैत्विदं देवकारितं.

43 a) K3.4 Dn D2–4.7.8 G1.2 तु; K5 D1 च; D9 न (for नु). D9 मत् (for तत्). B2 कौशलं (for कलुषं). — b) K3 D8 एतन्; D5 T1 एवं; G3 एव (for एभिर्). — d) K1 समद्ययाः (sic); K5 D1.8 सुमेधया (for सुमध्यया). — For 43^{cd}, D5.6 S (except T3) subst.:

9* कर्णश्च द्रौपदेयाश्च पाञ्चाली वा सुमध्यमा ।

[G4 [इ]व (for वा).]

44 a) K1.2 यद्; D5.6 T1.2.4 G1–3 M1 त; G4 क (for य). — b) K1–3 D8 S (except T3) सन्ना: (for सन्ति). G3 सुदारुगाः (for °णे). — After 44^{ab}, G3 reads 47^{cd} for the first time, repeating it in its proper place. — c) K1.2.4.5 B Dn D1–4.7 T3 [अ]हं (for हि). — d) D5 T1 G3 पूर्व-; D6 T4 G1.2.4

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

C. 18. 70
B. 18. 2. 44
K. 18. 2. 44

न हि जानामि सर्वेषां दुष्कृतं पुण्यकर्मणाम् ॥ ४४
किं कृत्वा धृतराष्ट्रस्य पुत्रो राजा सुयोधनः ।
तथा श्रिया युतः पापः सह सर्वैः पदानुगैः ॥ ४५
महेन्द्र इव लक्ष्मीवानास्ते परमपूजितः ।
कस्येदानीं विकारोऽयं यदिमे नरकं गताः ॥ ४६
सर्वधर्मविदः शूराः सत्यागमपरायणाः ।
क्षात्रधर्मपराः प्राज्ञा यज्वानो भूरिदक्षिणाः ॥ ४७
किं नु सुप्तोऽस्मि जागर्मि चेतयानो न चेतये ।
अहो चित्तविकारोऽयं स्याद्वा मे चित्तविभ्रमः ॥ ४८

एवं बहुविधं राजा विममर्श युधिष्ठिरः ।
दुःखशोकसमाविष्टश्चिन्ताव्याकुलितेन्द्रियः ॥ ४९
क्रोधमाहारयच्चैव तीव्रं धर्मसुतो नृपः ।
देवांश्च गर्हयामास धर्मं चैव युधिष्ठिरः ॥ ५०
स तीव्रगन्धसंतप्तो देवदूतमुवाच ह ।
गम्यतां भद्र येषां त्वं दूतस्तेषामुपान्तिकम् ॥ ५१
न ह्यहं तत्र यास्यामि स्थितोऽस्मीति निवेद्यताम् ।
मत्संश्रयादिमे दूत सुखिनो भ्रातरो हि मे ॥ ५२
इत्युक्तः स तदा दूतः पाण्डुपुत्रेण धीमता ।

M_3 पाप- (for पुण्य-). K_4 B_2 D_9 G_5 -कर्मिणां; D_5 -कर्मणा (for °णाम्). $K_{1.2}$ दुष्कृतं (K_2 °ष्टानां) पापकर्मिणां.

45 ^{a}) D_4 विकृतं; T_3 किं कृतं (for किं कृत्वा). — ^{c}) $D_{3.6}$ अथ; T_3 तदा (for तथा). G_3 प्रिया- (for श्रिया). K_3 $D_{5.6.9}$ $T_{1.2.4}$ G M वृतः; K_5 पुनः (for युतः). $K_{4.5}$ D_1 (*inf. lin.* as in text) प्राप्तः; Dn D_{2-4} T_3 पापैः (for पापः). — ^{d}) K_5 सर्वे (for सर्वैः). D_5 G_3 M_5 सहानुजैः; D_9 तदानुगैः; G_5 M_{2-4} सहानुगैः (for पदा°). K_3 D_6 $T_{1.2.4}$ $G_{1.2.4}$ M_1 इह (K_3 T_1 स हि) सर्वैः सहानुगैः (T_4 G_2 °जैः).

46 ^{a}) D_6 $T_{2.4}$ $G_{1.2.4.5}$ M_{1-4} महेंद्रवच्च (for °द्र इव). — ^{d}) K_3 $B_{1.3.5.6}$ Dn $D_{1-4.7}$ $T_{2.3}$ य इमे; D_6 इति मे; D_9 यदीमे (for यदिमे). K_3 $D_{8.9}$ निरयं; $K_{4.5}$ नरक (for °कं).

47 ^{a}) $K_{1.4.5}$ B_6 T_{1-3} G M_{2-4} सर्वे; K_2 मम (for सर्व-). K_3 $D_{8.9}$ सर्वे धर्मपराः शूराः. — ^{b}) $K_{1.2}$ सत्यशौच-; $K_{4.5}$ T_2 सत्यधर्म-; D_5 T_1 G_3 M_5 सर्वे धर्म-; T_4 $G_{1.2}$ सर्वे त्याग- (for सत्यागम-). T_3 सत्यागममपारणाः. — G_3 reads 47^{cd}, for the first time, after 44^{ab}. — ^{c}) G_1 सर्वे (for क्षात्र-). $K_{2.3}$ Dn_1 $D_{6.8.9}$ $T_{1.4}$ M_4 -रताः (for -पराः). $K_{4.5}$ D_1 शांता; B Dn $D_{2-4.6.7}$ $T_{3.4}$ $G_{4.5}$ M_4 संतो (for प्राज्ञा). — ^{d}) $K_{1.2}$ $D_{4.6.9}$ $T_{1.2.4}$ $G_{1.2.3}$ (both times). $_{4.5}$ $M_{1-3.5}$ यज्वानः सत्यसंगराः; M_4 यज्वनः प्राज्ञसंगराः.

48 ^{a}) K_{3-5} Dn_2 D_6 तु (for नु). — ^{b}) D_5 T_1 G_3 M_5 न (D_5 स) चिंतये (for न चे°). K_3 D_8 चिंतयामि न चिंतये; D_6 $T_{2.4}$ $G_{1.2.4.5}$ M_{1-4} चेतया(G_4 °मा)नश्च चिंतये. — ^{c}) $K_{1.2}$ अथो (for अहो). K_3 $D_{8.9}$ पित्त-; $K_{4.5}$ D_1 किं नु (for चित्त-). — ^{d}) K_3 $D_{8.9}$ येन; G_5 M_2 स्याद्यो; M_3 साद्या (for स्याद्वा). D_6 वै; T_3 मा (for मे). K_5 विभु-; D_8 वित्त- (for चित्त-). $M_{4.5}$ -विभ्रमाः (for °मः).

49 ^{a}) Dn बहुविधा (for °विधं). T_2 राजन् (for राजा). — ^{b}) $K_{1.2.4.5}$ B Dn_1 D_{1-4} विममर्ष; T_4 विवमर्श (for विम°). — ^{c}) K_5 हर्षशोकसमायुक्तश्. — Dn_2 reads 49^d on marg. — ^{d}) K_1 चित्त- (for चिन्ता-).

50 ^{a}) K_1 अहारयच्. $K_{3.4}$ D_1 तीव्रं; G_4 चेह (for चैव). K_5 क्रोधमाहार्यं तीव्रं*; D_9 क्रोधमाहरयश्चैव. — ^{b}) T_2 M_5 नृप (for नृपः). K_{3-5} $D_{1.8}$ धर्मराजो युधिष्ठिरः. — $K_{1.2}$ om. 50^{cd}. — ^{d}) K_3 D_8 तदा नृपः; $K_{4.5}$ $B_{2.4}$ $D_{1.9}$ नराधिपः (K_5 °प); D_5 T_1 $G_{3.5}$ M_{2-5} जनाधिप (G_5 M_{2-5} °पः); D_6 $T_{2.4}$ $G_{1.2.4}$ M_1 महामतिः (for युधिष्ठिरः).

51 ^{a}) $K_{1.2}$ $D_{5.6}$ S -शोक-; K_3 D_9 -कोप- (for -गन्ध-). K_3 -संयुक्तो (for -संतप्तो). — ^{b}) T_2 तीव्रशोकम् (for देवदूतम्). K_2 B_4 D_9 तं; G_3 हा (for ह). K_1 देवदूतमवोचत. — ^{c}) K_1 दूत; K_4 $B_{1.3.5.6}$ Dn $D_{1-4.7}$ T_3 तत्र; K_5 तात; B_4 यत्र (for भद्र). K_3 D_5 T_3 G_3 एषां; G_1 घोषं (for येषां). D_6 G_1 च (for त्वं). — ^{d}) T_3 दूतास् (for दूतस्). $K_{3.5}$ D_8 G_5 उपांतिके (G_5 °कः) (for °कम्).

52 ^{a}) K_3 $D_{8.9}$ गच्छामि (for यास्यामि). — ^{c}) D_9 अमी (for इमे). Bom. ed. दूताः (for दूत). — ^{d}) B_3 D_5 दुःखिनो (for सुखिनो).

53 ^{a}) D_6 सततं; T_3 ते तदा; M_3 तेन वै (for स तदा). — ^{b}) K_3 $D_{8.9}$ भारत; $D_{5.6}$ $T_{1.4}$ G M वद्वचः (for धीमता). — ^{c}) D_9 आजगाम च यत्रास्ते;

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जगाम तत्र यत्रास्ते देवराजः शतक्रतुः ॥ ५३
निवेदयामास च तद्धर्मराजचिकीर्षितम् ।
यथोक्तं धर्मपुत्रेण सर्वमेव जनाधिप ॥ ५४

इति श्रीमहाभारते स्वर्गारोहणपर्वणि द्वितीयोऽध्यायः ॥ २ ॥

३

वैशंपायन उवाच ।
स्थिते मुहूर्तं पार्थे तु धर्मराजे युधिष्ठिरे ।
आजग्मुस्तत्र कौरव्य देवाः शक्रपुरोगमाः ॥ १
स्वयं विग्रहवान्धर्मो राजानं प्रसमीक्षितुम् ।
तत्राजगाम यत्रासौ कुरुराजो युधिष्ठिरः ॥ २
तेषु भास्वरदेहेषु पुण्याभिजनकर्मसु ।
समागतेषु देवेषु व्यगमत्तत्तमो नृप ॥ ३
नादृश्यन्त च तास्तत्र यातनाः पापकर्मिणाम् ।
नदी वैतरणी चैव कूटशाल्मलिना सह ॥ ४
लोहकुम्भ्यः शिलाश्चैव नादृश्यन्त भयानकाः ।
विकृतानि शरीराणि यानि तत्र समन्ततः ।
ददर्श राजा कौन्तेयस्तान्यदृश्यानि चाभवन् ॥ ५ C. 18. 83 B. 18. 3. 6 K. 18. 3. 6

T_3 G_4 M_4 जगाम यत्र तत्रास्ते.

54 [a]) $K_{4.5}$ B_6 $D_{1.6}$ तदा; B_1 $D_{5.9}$ T_4 G_2 $M_{4.5}$ च तं (for च तद्). — [b]) K_1 देवराजस्य चेष्टितं. — [c]) K_3 $D_{8.9}$ -राजेन (for -पुत्रेण). — [d]) G_5 स्वयम् (for सर्वम्). $B_{1.2.4}$ D_1 एतज्; T_4 एवं (for एव). K_1 M_1 जनाधिपः; D_9 नराधिप.

Colophon. — *Adhy. name :* $K_{1.2}$ देवदूतविसर्जनं. — *Adhy. no.* (figures, words or both): $K_{2.4.5}$ B_6 Dn $D_{3.7.9}$ S 2 (as in text). — *Śloka no.:* K_4 79; K_5 Dn_1 $D_{8.9}$ 54.

3

1 [a]) K_5 M_3 मुहूर्तें (for °र्तं). K_5 पार्थेन; D_8 पार्थें नु (for पार्थे तु). — [b]) D_8 धर्मपुत्रे युधिष्ठिरे. — [c]) G_5 M_{2-4} कौरव्यं. — [d]) K_3 D_8 इंद्र- (for शक्र-).

2 [a]) $K_{4.5}$ $B_{1.2.4-6}$ Dn $D_{1-4.7}$ T_8 स च (for स्वयं). — [b]) T_3 राजा (for राजानं). K_{1-3} D_9 G_4 प्रप(\ K_3 तं प-; G_4 तु प)रीक्षितुं; K_5 प्रसमीक्षितं; $D_{5.6}$ T_4 $G_{1.2}$ M_1 संप(D_5 G_1 स प)रीक्ष्य तं; D_8 समुदीक्षितुं; T_1 $G_{3.5}$ M_{2-5} परिरक्षितुं; T_2 संपरीक्षितं (for प्रसमीक्षितुम्). — [c]) K_2 तत्रागच्छत्स; T_1 G_3 ततो जगाम (for तत्रा°). B_6 तत्र (for यत्र). K_{1-3} $D_{5.6.9}$ S (except T_3) [आ]स्ते (for [अ]सौ). — [d]) K_5 महामनाः (for युधिष्ठिरः).

3 [a]) D_8 om. (hapl.) from भास्वर up to देवेषु (in 3[c]). $K_{1.2}$ B_4 Dn $D_{2.8}$ T_3 भासुर-; D_7 [अ]भास्वर- (for भास्वर-). — [c]) D_5 देशेषु (for देवेषु). $K_{4.5}$ सम्यग्गतेषु (K_4 व्यगमत्तेषु) देशेषु; M_2 समवेतेषु देवेषु. — [d]) K_3 तत्रत्यं (for व्यगमत्). D_9 G_5 ततो (for तमो). K_5 वागमं तं ततो नृप; D_7 व्यगमंस्तत्र ये नृप; G_4 [अ]प्यगमंत ततो नृप (sic).

4 [a]) G_5 M_{1-4} नापश्यत (for नादृश्यन्त). D_1 ततस् (for च तास्). K_1 नादृश्यंतश्च तांस्तत्र; K_5 नापश्यत नृपस्तत्र; $D_{5.6}$ $T_{1.2.4}$ G_{1-4} M_5 नापश्यत तदा त(T_2 G_2 य)त्र. — [b]) K_5 वाम-; B_3 T_1 G_3 पुण्य- (for पाप-). $B_{1.3.5.6}$ D_{4-6} T G_{1-4} $M_{1.5}$ -कर्मणां (for -कर्मिणाम्). — [c]) K_2 तत्र; D_8 या तत्र (for चैव). $D_{5.6}$ $T_{1.2.4}$ $G_{1.2.4.5}$ M नदीं वैतरणीं चैव ($G_{1.4}$ तत्र). — [d]) K_1 D_8 $T_{2.4}$ $G_{1.2.4.5}$ M -शल्मलिना (for -शाल्म°).

5 [a]) $K_{4.5}$ $B_{1.3}$ लोहकुंभाः; D_5 $T_{1.2.4}$ $G_{2.5}$ $M_{2.3.5}$ °कुंभीः; D_6 G_1 M_4 °कुंभी; D_9 सोहं कुंभी; G_3 लोहकुंड- (for लोहकुम्भ्यः). K_3 लोहोत्कुंभ्यः शिलास्तत्र; G_4 लोहकुंभीकुलाश्चैव. — [b]) $D_{5.6}$ $T_{1.2.4}$ G_{1-4} $M_{1.3}$ मशकान्दं(T_2 °न्द)शकानपि; G_5 $M_{2.4.5}$ नापश्यंस्तत्र तत्र ह. — [d]) D_9 यत्र (for तत्र). — [e]) B_6 om.; G_4 राजन् (for राजा). $B_{1.5.6}$ Dn $D_{2-4.7}$ T_3 कौरव्यस् (for कौन्तेयस्). — [f]) K_2 दृश्यानि (for अदृ°). $K_{3.5}$ वा (for च). K_4 तान्यदृश्यान्यथाभवन्; $D_{5.6}$ $T_{1.2.4}$ G_{1-4} M_1 तान्सर्वान्सुमहाप्रभान् (G_3 °मनाः; M_1 °व्रतान्); G_5 M_{2-5} तानदृश्यान्म(M_4 °श्यं म)हाप्रभान्.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

C. 18. 86 B. 18. 3. 6 K. 18. 3. 7

ततो वायुः सुखस्पर्शः पुण्यगन्धवहः शिवः ।
ववौ देवसमीपस्थः शीतलोऽतीव भारत ॥ ६
मरुतः सह शक्रेण वसवश्चाश्विनौ सह ।
साध्या रुद्रास्तथादित्या ये चान्येऽपि दिवौकसः ॥ ७
सर्वे तत्र समाजग्मुः सिद्धाश्च परमर्षयः ।
यत्र राजा महातेजा धर्मपुत्रः स्थितोऽभवत् ॥ ८
ततः शक्रः सुरपतिः श्रिया परमया युतः ।
युधिष्ठिरमुवाचेदं सान्त्वपूर्वमिदं वचः ॥ ९
युधिष्ठिर महाबाहो प्रीता देवगणास्तव ।
एह्येहि पुरुषव्याघ्र कृतमेतावता विभो ।
सिद्धिः प्राप्ता त्वया राजँल्लोकाश्चाप्यक्षयास्तव ॥ १०
न च मन्युस्त्वया कार्यः शृणु चेदं वचो मम ।
अवश्यं नरकस्तात द्रष्टव्यः सर्वराजभिः ॥ ११
शुभानामशुभानां च द्वौ राशी पुरुषर्षभ ।
यः पूर्वं सुकृतं भुङ्क्ते पश्चान्निरयमेति सः ।
पूर्वं नरकभाग्यस्तु पश्चात्स्वर्गमुपैति सः ॥ १२
भूयिष्ठं पापकर्मा यः स पूर्वं स्वर्गमश्नुते ।
तेन त्वमेवं गमितो मया श्रेयोर्थिना नृप ॥ १३

---

6 [a]) K_{1-4} $D_{1.5.6.8.9}$ S (except T_3) तत्र (for ततो). K_1 G_4 वायु- (for वायुः). — T_1 om. 6^b–8^c. —[b]) D_8 पुण्यं (for पुण्य-). $K_{3.4}$ $B_{1.5.6}$ Dn $D_{2-4.7.8}$ T_3 M_5 शुचिः; $D_{5.9}$ $G_{3.4}$ शुभः (for शिवः). — Dn_2 reads 6^c–8^b on marg. —[c]) G_2 ययौ (for ववौ). $G_{2.3.5}$ M_3 देवः (for देव-). K_5 -समीपस्थौ (for °पस्थः). —[d]) D_9 सीतलो. $D_{5.6}$ T_2 $G_{1.5}$ M शीतळोमृ(D_5 °लासृ-; D_8 M_{3-5} °लोसृ)तसंमि(M_1 °सस्मि)तः; T_4 $G_{2.8}$ °ळो मृदुसंमितः; G_4 °ळोमृतसंनिभः.

7 T_1 om. 7 (cf. v. l. 6). Dn_2 reads 7 on marg. —[a]) K_3 मारुतः; $D_{3.6}$ $T_{2.4}$ G M_{2-5} मरुद्भिः; D_9 महतः (for मरुतः). B_8 शुक्रेण (for शक्रेण). — G_4 om. 7^b–8^a. —[b]) K_5 तथा; $D_{1.8}$ च ह (for सह). K_{1-3} $D_{5.6.9}$ $T_{2.4}$ $G_{1-3.5}$ M वसवश्च (D_6 G_1 °स्तु) सहाश्विना (K_3 G_1 M_2 °श्विना; G_2 M_1 °श्विनौ). —[c]) D_8 साध्य- (for साध्या). D_9 साध्यादित्यास्तथा रुद्रो. —[d]) D_9 G_3 च (for ऽपि).

8 T_1 om. 8^{abc} (cf. v. l. 6). G_4 om. 8^a (cf. v. l. 7). M_1 om. 8^{ab}. Dn_2 reads 8^{ab} on marg. —[b]) $K_{1.2}$ सिद्धाश्च भरतर्षभ. —[c]) B_4 (marg. as in text) D_5 G_8 M_4 तत्र (for यत्र). —[d]) B_4 धर्मसूनुः (for °पुत्रः). $K_{4.5}$ D_1 तदा (for स्थितो). K_{1-3} $D_{5.6.8.9}$ $T_{1.2.4}$ G M_{2-5} स्थितो धर्मसुतोभवत्.

9 [a]) K_4 D_1 तत्र (for ततः). —[c]) B_2 [इ]ह (for [इ]दं). —[d]) $B_{4.6}$ शांत्व° (for सान्त्व°). D_4 इदं ततः; D_6 $T_{2.4}$ $G_{1.2.4}$ M_1 हि मानयन् (for इदं वचः).

10 Before 10, M_2 ins. शक्रः. —[a]) T_2 महाबुद्धे (for °बाहो). —[b]) K_1 सुर- (for देव-). $D_{5.6}$ $T_{1.2.4}$ G_{2-4} $M_{1.2}$ (*inf. lin.*). $_{8-5}$ त्वया; G_1 तथा (for तव). Bom. ed. लोकाश्चाप्यक्षयास्तव = 10^f. — K_1 om. (hapl.) 10^{cdef}. —[c]) G_4 येह्येहि (sic). K_{2-5} $B_{1-4.6}$ $D_{8.9}$ मनुज- (for पुरुष-). —[d]) K_5 [अ]भिभोः (for विभो). D_9 कृता**वता त्वया. —[e]) K_5 सिद्धेः; T_3 G_4 सिद्धि- (for सिद्धिः). $G_{2.4}$ प्राप्तास्. $K_{4.5}$ B Dn $D_{1-4.7.8}$ T_3 महाबाहो (for त्वया राजँल्). —[f]) K_5 अप्यया; G_2 अक्षयस् (for °यास्). K_3 D_8 जिताः (for तव). D_9 लोकाथाप्यक्षयास्तव. — After 10, $D_{5.6}$ $T_{2.4}$ $G_{1.2.4}$ $M_{1.3}$ ins.:

10* भ्रातृणां सुहृदां चैव गतिर्नित्या सुपूजिता ।

[D_5 पितृणां (for सुहृदां). $D_{5.6}$ T_4 G_2 नित्यं (for नित्या).]

11 $D_{5.6}$ $T_{2.4}$ $G_{1.2.4}$ M_1 transp. 11^{ab} and 11^{cd}. —[a]) K_5 तथा (for त्वया). —[b]) $D_{5.6}$ T_4 G_1 देव; G_2 देवं (for चेदं). $K_{1.2}$ T_2 वचः परं; $D_{5.6}$ T_4 $G_{1.2.4.5}$ M_{1-4} परं वचः (for वचो मम). —[c]) K_2 नरकास्; D_{5-7} S (except T_3) °कं (for °कस्). K_5 D_5 T_1 M_2 तावद् (for तात). —[d]) $K_{1.2.5}$ द्रष्टव्या (K_2 °व्याः); $D_{5.6}$ S (except T_3) °व्यं (for °व्यः).

12 K_4 om. 12^{abcd}. —[a]) G_3 चाशुभानां (for अ°). —[b]) D_8 द्वे (for द्वौ). —[c]) K_2 om. यः. B_3 पूर्वं यः (by transp.); D_4 यत्पूर्वं-. —[d]) T_1 G_8 नरकम् (for निरयम्). Dn D_{2-5} $T_{1.3}$ G_3 एव (for एति). K_5 न पश्चान्निरयेषु नः; D_1 स पश्चान्निरयं पुनः. — D_6 om. (hapl.) 12^{ef}. —[e]) K_5 damaged; T_1 G_1 च (for तु). D_5 $T_{2.4}$ G_{2-5} M पूर्वं निरयभाग्यश्च. —[f]) D_1 वै (for सः). $K_{4.5}$ स पश्चात्स्वर्गमेति वै. — $B_{2.3}$ ins. 11* after 12; while D_8 ins. 12* after the same.

13 [a]) K_5 D_6 $T_{1.3.4}$ $G_{1-3.5}$ M_{1-3} भूयिष्ठ-; $B_{2.8}$ °ष्ठः (for °ष्ठं). K_5 -धर्मा (for -कर्मा). — D_3 om.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्याजेन हि त्वया द्रोण उपचीर्णः सुतं प्रति ।
व्याजेनैव ततो राजन्दर्शितो नरकस्तव ॥ १४
यथैव त्वं तथा भीमस्तथा पार्थो यमौ तथा ।
द्रौपदी च तथा कृष्णा व्याजेन नरकं गताः ॥ १५
आगच्छ नरशार्दूल मुक्तास्ते चैव किल्बिषात् ।
स्वपक्षाश्चैव ये तुभ्यं पार्थिवा निहता रणे ।
सर्वे स्वर्गमनुप्राप्तास्तान्पश्य पुरुषर्षभ ॥ १६
कर्णश्चैव महेष्वासः सर्वशस्त्रभृतां वरः ।
स गतः परमां सिद्धिं यदर्थं परितप्यसे ॥ १७
तं पश्य पुरुषव्याघ्रमादित्यतनयं विभो ।
स्वस्थानस्थं महाबाहो जहि शोकं नरर्षभ ॥ १८
भ्रातॄंश्चान्यांस्तथा पश्य स्वपक्षांश्चैव पार्थिवान् ।
स्वं स्वं स्थानमनुप्राप्तान्व्येतु ते मानसो ज्वरः ॥ १९
अनुभूय पूर्वं त्वं कृच्छ्रमितःप्रभृति कौरव । C. 18. 102 B. 18. 3. 22 K. 18. 3. 23

13^{b}. — ^{b}) K2 स्व- (for स). — K1–3 D5. 8 T4 ins. after 13^{ab}: B2. 3 after 12:

11* भूयिष्ठं शुभकर्मा यः पूर्वं नरकमश्नुते ।

[D8 भूयिष्ठ-. K2 तु (for यः). K3 D8 निरयम् (for नरकम्). D5 T4 स पूर्वं नरकं व्रजेत् (for the post. half).]

— K1–3 D5 cont.: D6. 8 S ins. after 12:

12* भूयिष्ठशुभकर्मा त्वमल्पं जिह्मं तवाच्युत ।

[K1. 2 भूयिष्ठं (for °ष्ठ-). G5 -कर्म ते (sic) (for -कर्मा त्वम्). G3 अल्पजिह्मांस् (for अल्पं जिह्मं). D8 भवानघ (for तवाच्युत). K1. 3 अल्पजिह्मं तवानघ; D5. 6 T1. 4 G1. 2. 4 M4 अल्पजिह्म(D5. 6 T4 G4 °जिह)तया(M4 °स्तथा)च्युत (G2 °तः) (for the post. half).]

— ^{c}) K2 वाम् (for त्वम्). K2 D8. 9 T2 एव; K4 इव (for एवं). T2 [आ]गमितो; T3 क्रमितो (for ग°). — ^{d}) K5 श्रेयोर्थवा (sic) (for °र्थिना). B2 तव; B3 सह; D8 विभोः (for नृप). B5 मया श्रेयोर्थिनामपि.

